नं· ६·४

निरुत्तरतंत्र

नं· १६५२

10

60/40

35

निरुत्तर तंत्रम्

निरु॰ तं॰ १

ॐ श्रीगणेशाय नमः ॐ नमः परमदेवतायै । श्रीदेव्यु
वाच । सिद्धविद्या पुरा प्रोक्ता मंत्रमंत्रादिकानि च । ना
नाभावप्रभेदेन संशयो जायते प्रभो । भावभेदेन क
थय लोकनिस्तारकारक । सर्वेषां शरणं तंत्रसिद्धां
तं विस्तरसम्मतं । आसामाराधनाकेन भावेन परिजा
यते । आसां वा प्रकृतिः कापि तासां वा कीदृशी क्रि
या । तत्प्रकाशय सम्यङ्मे येन यासि निरुत्तरं ।
श्रीशिव उवाच । सर्वासां सिद्धविद्यानां प्रकृतिर्दक्षि
णा प्रिये । दिव्यैर्वा वीरभावैर्वा चिंतयेद्दक्षिणां शुभां ।
दिव्यभावेषु वीरेषु कालीकुलं विचिंतयेत् । श्रीकु
ले च त्रिभिः सर्वैश्चिंतयेत् कुलसुन्दरि । काली तारा
रक्तकाली भुवना महिषमर्द्दिनी । त्रिपुटा त्वरिता
दुर्गा विद्या प्रत्यंगिरा तथा । कालीकुलं समाख्यातं
श्रीकुले च ततः परं । सुन्दरी भैरवी वाला वगला क
मला पि च । धूमावती च मातंगी विद्या स्वप्नावती प्रि
ये । मधुमती महाविद्या श्रीकुलं परिभाषितं । ल
तायां पूजयेत् कालीं नीले नीलसरस्वतीं । कालिके
वलतामूलो नीलमूला च तारिणी । उभयोरुभयोः
पूजा सा पूजा मोक्षदायिनी । विशिष्टा चेन्महासिद्धि
र्देवानामपि दुर्लभा । लतानीलं विनादेवि काली

नाथंच पूजयेत्। कुलनाथं समाश्रित्य चोपदेशं
प्रकल्पयेत्। कुलनाथं विनादेवि मंत्रे तंत्रे न सि
ध्यति। भावस्तु त्रिविधोदेवि तथैव मंत्रदेवता।
कुलशास्त्ररता ज्ञेया गुरवो बहवः स्मृताः। कुल
शास्त्रविशेषज्ञो गुरुरेकोहि दुर्लभः। पशु गुरो
र्मंत्रंलब्ध्वापि पशुरेव न संशयः। वीरगुरोर्मंत्रंल
ब्ध्वावीर एव न संशयः। दिव्यगुरोर्मंत्रंल
ब्ध्वादिव्य एव न संशयः। दिव्ये वीरेच यो भेदः स
भेदःपरिभाष्यते। दिव्यश्च देवताप्रायोवीर श्चोद्ध
तमानसः। पूर्वाम्नायोदितं कर्मपाशवं परिकी
र्तितं। यदुक्तं दक्षिणाम्नाये तदेव पाशवं स्मृतं।
पश्चिमाम्नायदजं कर्म वीरपशुसमन्वितं। उद
ङ्मुखोदितं कर्म दिव्यभावान्वितंप्रिये। दिव्योऽपि
वीरभावेन साधयेत् पितृकानने। ऊर्ध्वाम्नायो
दितंकर्म दिव्यभावाश्रितंप्रिये। श्मशानगामि
नोवीराः कलां पूजंति सर्वदा। श्मशानगामिनो
वीरागुप्तायोनीव पार्वति। गोपनात् सिद्धिमा
प्नोति व्यक्ताच्च कुलनाशनं। दिव्यवीरान्वितं क
र्मफलदं गोपनान्वितं। देवतागुरुमंत्राणां प्र
भावं दर्शयेत्ततः। दिव्यौघयीनां वीराणां यद्द्य

नि.रू. तं. २

त् कर्म्मच योगिनां। ततसर्व्वं गोपनं कार्य्यं प्रकाशा
न्निष्फलं भवेत्। रात्रौ कुलक्रिया कुर्य्याद्दिवा कुर्य्या
च्च वैदिकीं। दिवारात्रौ यजेद्देवीं योगी योगप्रभेद
तः। नदिवा पूजयेद्वीरो नपशुरात्रिपूजनं। विव
र्ज्जयेन्महेशानि ह्यभिचाराय कल्पते। कलापूजां
विधायाथ मनसावा कुलेश्वरी। पूजयेद्दक्षिणां
कालीं श्मशाने कुलसाधकः। श्मशानं दक्षिणा
स्थानं श्मशानंच सदाशिवं। योनिरूपा महाका
ली शवशय्या प्रकीर्त्तिता। श्मशानं द्विविधं देवि
चिता योनिः प्रकीर्त्तिता। शिवलिंगं कुलेशानि
महाकालेन भाषितं। द्वयोर्योगं विनानैव दक्षि
णा साफलप्रदा। त्रिपान्तरे कलापूजा कर्त्तव्या सा
धकोत्तमैः। कलापूजां विनादेवि दक्षिणा न फल
प्रदा। कलापूजा कृता येनतेन काली प्रपूजिता।
कलापूजा कृतायेन शिव एव न संशयः। क
लापूजाकृतो दिव्यो वीरो वा कुलसुन्दरि। इहैव
सुखमाप्नोति परे निर्व्वाणतां व्रजेत्। नचार्च्चयेत्
कलां यस्तु नजपेद्दक्षिणांशुभां। निष्फलं जीव
नं तस्य कुप्या भवति कालिका। कलापूजां वि
नादेवि सर्व्वं निष्फलतां व्रजेत्। जन्मान्तरसह

स्वेषु कालीनैव प्रसीदति। कलापूजां विनादे
वि याकाचित् क्रियते क्रिया। सा क्रिया व्यभिचा
राय सत्यं सत्यं नसंशयः। तस्मात् सर्व्वप्रयत्ने
न कलापूजां समाचरेत्। योनिरूपा कलादेवि
दक्षिणैव नसंशयः। दिव्यो वीरो वरारोहे कला
पूजां प्रकल्पयेत्। पशुभावाश्रितो मंत्री कलां
नैव प्रपूजयेत्। कलायाद्विविधा पूजा गुप्ता व्य
क्ता कुलेश्वरि। गुप्ता च साधकैः कार्य्या निर्ज्जने च
महानिशि। व्यक्ता दिवा प्रकर्त्तव्या लोकाचारक
मेण तु। लोकाचारं विना देवि गोपनं नैव जाय
ते। गोपनं सिद्धिमूलं च सत्यं सत्यं न संशयः।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च कुलसुन्दरि।
कलावासवयोगेन कलापूजां प्रकल्पयेत्।
द्रव्याभावे द्विजो दद्याच्चानुकल्पं युगे युगे। क
लायाश्चानुकल्पश्च कलायाश्चैव चिन्तनं। द्वि
जातीनां च सर्व्वेषां द्विधा विधिरिहोच्यते। द्विधा
च पाशवं कर्म्म रात्रिकर्म्म च कौलिकं। पुरश्च
र्य्यादिकं कर्म्म द्विविधं भावभेदतः। इति श्रीनि
रुत्तरतंत्रे पार्व्वतीश्वरसंवादे प्रथमः पटलः १
श्रीदेव्युवाच देव देव महादेव सृष्टिस्थितिल

यात्मक। कीदृशी दक्षिणाकाली तस्या मंत्रश्च की
दृशः। पूजा वा कीदृशी तस्याः पूजायाः कीदृशं फ
लं। गुरुर्वा कीदृशो देव पुरश्चर्या च कीदृशी। सा
धनं कीदृशं तस्याः फलं तस्य च कीदृशं। तत् प्र
काशय सम्यङ्मे येन यामि निरुत्तरं। श्रीशिवउ
वाच। भगं भगवती ज्ञेया दक्षिणा त्रिगुणेश्वरी।
चराचरमिदं सर्वं भगरूपं कुलेश्वरि। महत्त्वादी
नि सर्वाणि त्रिविधं परिकथ्यते। हकारार्द्धकला
त्मा योनिमध्यस्वरूपिणी। योनिश्च दक्षिणा
काली ब्रह्मविष्णुशिवात्मिका। त्रिकोणे च त्रयो
देवाः शिवविष्णुपितामहः। योनिमध्ये वसेद्देवी
कालिका कुलसुन्दरी। ज्योतीरूपा महाकाली
शुक्ररूपा प्रपंचसू। शुक्रतो जायते विश्वं शिव
शक्तिप्रभेदतः। शिवशक्तिर्द्विधा देवि निर्गुणा
सगुणापि च। निर्गुणा ज्योतिषां हन्त परंब्रह्म स
नातनी परं च पुरुषं विद्धि महानीलमणिप्रभं।
ज्योतिश्च दक्षिणाकाली ह्रस्वा स्यात् प्रपंचसू।
विपरीतरता काली निर्गुणा सगुणापि च। अमा
स्यान्निर्गुणे सापि अनिरुद्धसरस्वती। सगुणा सु
रगर्भे च महाकालनिरूपिणी। नारीरूपं समा

स्याय सैव विश्वं प्रसूयते। विष्णुमाया महाल
क्ष्मीर्मोहयत्यखिलं जगत्। सत्ववानेव सा देवी
योनिमार्गे चराचरं। देवमार्गमिदं विश्वं देवमार्ग
निषेवितं। शिवशक्तिमयं तत्त्वं तत्त्वज्ञानस्य का
रणं। वहूनां जन्मनामन्ते शक्तिज्ञानं प्रजायते।
शक्तिज्ञानं विना देवि निर्वाणं नैव जायते। सा श
क्तिर्दक्षिणाकाली सिद्धविद्यास्वरूपिणी। सिद्ध
विद्यास्तु सर्वास्तु दक्षिणा प्रकृतिः पुमान्। अविना
भावसम्वन्धस्तयोरेव परस्परं। शिवोऽपि तत्र यु
क्तश्चेच्छक्तिः स्याच्छिवयोगतः। तयोर्योगमयं त
त्त्वं तयोर्योगेन चिंतनं। तयोर्योगमयं मंत्रं तयो
र्योगेन संजपेत्। तयोर्मंत्रं महामंत्रं भोगमोक्ष
प्रदायकं। भोगेन लभते मोक्षं सालोक्यादि चतु
ष्टयं। महाकल्पतरुः काली अनिरुद्धसरस्वती।
ब्रह्मविष्णुमहेशानां भुक्तिमुक्त्यैककारणं। सा
काली गुरुतो साध्या मंत्रतंत्रस्वरूपिणी। अथ व
क्ष्ये कुलेशानि दक्षिणाकालिकामनुं। येन विज्ञा
नमात्रेण जीवन्मुक्तः प्रजायते। ब्रह्मासनयुतं
देवि नादविन्दुसमन्वितं। वामनेत्रार्णसंयुक्तं चि
न्तस्वरूपं परापरं। एकाक्षरी सिद्धविद्या मंत्ररा

त्री कुलेश्वरि। त्रिगुणा च कूर्चयुग्मं लज्जायुग्मं ततः
परं। दक्षिणे कालिके चेति सप्तबीजानि योजयेत्।
अंते वह्निवधूं दद्याद्विद्याराज्ञी प्रकीर्त्तिता। सर्व्वमं
त्रमयी विद्या सृष्टिस्थित्यंतकारिणी। अपि चेत् ब
न्तसमा नारी मन्तसमः पुरुषोऽस्ति चेत्। अनिरुद्ध
सरस्वत्याः समो मंत्रोऽस्ति वै तदा। ब्रह्मा रुद्रश्च वि
ष्णुश्च सर्व्वे देवा उपासकाः। वेदागमपुराणेषु व
न्दिता कालिका शुभा। कालिका कामपीठेषु सर्व्व
कामप्रदायिनी। स्वर्गे मर्त्ये च पाताले ये केचित्
संति भैरवाः। ते सर्व्वे कालिकापुत्रास्ते मुक्ता नात्र
संशयः। संकेतमार्गाद्देवेशि नाभिषेकं गुरुक्रमा
त्। पूजाकाले विशेषेण तं त्यजेदंत्यजं यथा। भै
रवोऽस्य ऋषिः प्रोक्तः उष्णिक् छन्दः प्रकीर्त्तितं।
देवता दक्षिणाकाली अनिरुद्धसरस्वती। ह्रां बी
जं हूं शक्तिश्च क्रीं चैव कीलकं स्मृतं। धर्म्मार्थका
ममोक्षेषु विनियोगः प्रकीर्त्तितः। न्यासजालं पुरा
प्रोक्तं नानातंत्रेषु पार्व्वति। न्यासजालयुतो मंत्री
वीरभावेन पूजयेत्। विपंचारे महापीठे योनिपी
ठे प्रपूजयेत्। ध्यायेत् कालीं करालास्यां पीनोन्न
तपयोधरां। महामेघप्रभां श्यामां घोररावां चतु

र्भुजां । सद्यश्छिन्नशिरः खड्गवामोर्द्धाधःकराम्बुजा
म् । अभयं वरदं चैव दक्षिणोर्द्धाधःपाणिकां । पंचा
शद्वर्णमुण्डालीगलद्रुधिरचर्च्चितां । सृक्कद्वयगल
द्रक्तधाराविस्फुरिताननां । शिवाभिर्घोररावाभिश्च
तुर्द्दिक्षु समन्वितां । शवानां करसंघातैः कृतकां
ची हसन्मुखीं । दिगम्बरी मुक्तकेशी चन्द्रार्द्धकृत
शेखरां । शवरूपमहादेवहृदयोपरि संस्थितां ।
महाकालेन च समं विपरीतरतातुरां । मदिराघू
र्णनयनां स्मेराननसरोरुहां । अट्टहासां महारौ
द्रीं सर्वदानन्दकारिणीं । एवं संचिन्तयेत् कालीं
श्मशानालयवासिनीं । एवं ध्यात्वा यजेद्धीरो निशा
यां कुलमन्दिरे । मानसं पूजनं कृत्वा कुलद्रव्यं स
माहरेत् । मानसे पूजनेनैव गछेत् पितृकानने ।
सपापिष्ठा यजेन्नैव कालीं कलुषहारिणीम् । उच्चै
र्नोच्चारयेन्मंत्रं मनसा च स्मरेन्मनुं । तत्र चावाहनं
नेष्टं कामाख्यायां कुलेश्वरि । आराध्य मनसा भक्त्या
वाह्यपूजामथाचरेत् । आत्मशुद्धिं द्रव्यशुद्धिं कृत्वा
पात्राणि विन्यसेत् । अर्घ्यपात्रादिकं तत्र विन्यसेद्वि
धिपूर्वकं । पीठपूजां विधायाथ पूजयेत्तत्र देवतां ।
चिन्तयेत् परया भक्त्या विधिदृष्टेन कर्मणा । आ

सनं स्वागतं पाद्यमर्घ्यमाचमनीयकं। स्नानं वस्त्रो
पवीतंच भूषणानि च सर्व्वशः। गंध पुष्पं धूपदी
पौ मधुपर्कंततः परं। मंत्रपुष्पार्घ्यदानञ्च तर्पणं
च ततःपरं। माल्यानुलेपनंचैव पंच पुष्पांजली
स्ततः। पुनः प्रपूजयेद्देवीं महाकालेन लालितां।
षोड़शोपचारयुक्ता ह्येषा पूजा प्रकीर्त्तिता। अष्टा
भिः शक्तिभिश्चापि लोकपालैश्च समन्ततः। पीठमं
त्रक्रमाद्यागः स मार्गपरमः स्मृतः। पीठेनैव स
मस्तेन वहिरावरणं विना। मंत्रे पूर्व्वकृतो यागो
नित्ययागः समध्यमः। केवलं पुष्पयागस्तु क
निष्ठपूजनं भवेत्। तत आज्ञां समादायावरणंच
प्रपूजयेत्। कमलां मुकुटे मूर्द्धिण कर्णे चकुण्ड
ले ततः। गुरुपङ्क्तिं ततो देवि महाकालं ततः
परं। धूम्रवर्णं महाकालं जटाभारान्वितं प्रिये।
त्रिनेत्रं शावरूपंच शक्तियुक्तं निरामयं। दिगम्ब
रं घोररूपं नीलांजनसमप्रभं। निर्गुणंच गुणा
धारं कालीध्यानं पुनः पुनः। काली कपालिनी
कुल्ला प्रथमेच त्रिकोणके। दलाष्टे पूजयेद्देवि
पूर्व्वादिक्रमयोगतः। ब्राह्मी नारायणी चैव कौ
मारीच महेश्वरी। अपराजिता चचामुण्डा वारा

ह्री नारसिंहिका। चतुर्द्वारे यजेद्देवि असितांगादिभै
रवान्। असितांगो रुरुश्चण्डः क्रोधो भीषण एव च।
उन्मत्तश्चकपाली च संहारक इति क्रमात्। पूर्वादिक्र
मतो देवि द्वारि द्वारि द्वयं द्वयं। इन्द्रादिदशदिक्पा
लान् दशादिक्षु प्रपूजयेत्। खड्गं मुण्डं यजेद्वामहस्ते
च कुलसुन्दरि। पूजयेद्दक्षिणेहस्ते अभयंच वरं त
था। पुनश्च पूजयेद्देवीं सायुधांच सवाहनां कुल्लुकां
मूर्द्धिन संजप्य हृदि सेतुं विचिन्तयेत्। महासेतुं कं
ठदेशे नाभौ योनिं विचिंतयेत्। सेतुंत्व प्रणवं देवि
हृदिस्थं न प्रपूजयेत्। निजबीजं महासेतुं कंठदेशे
विचिन्तयेत्। सविन्दुमातृकायुक्तां नाभिमध्ये विचिं
तयेत्। कालीकूर्च्चवधूर्म्माया फट्कारांतं सुरेश्वरि।
पंचाक्षरी कालिकायाः कुल्लुका परिचिंतयेत्। ता
रायाः कुल्लुका देवी महानील सरस्वती। अन्यासांच
वधूवीजं कुल्लुकापरिकथ्यते। कालीकुल प्रशस्ता
नां पूजायामेवमाचरेत्। अष्टोत्तरशतं जप्त्वा पुनः
पूजां प्रकल्पयेत्। पुनः प्रपूजयेद्देवीं महाकालेन
लालितां। ततस्तु कवचं देवि स्तवंच प्रपठेत्ततः। इ
ति श्रीनिरुत्तरतंत्रे शिवपार्व्वती संवादे द्वितीयः प
टलः २ श्रीदेव्युवाच। भगवन् सर्व्वदेवेश सर्व्वमन्त्र

नमस्कृतः। सर्व्वमे कथितं देव कवचं न प्रकाशितं। क
थयस्व सुरश्रेष्ठ यदि स्नेहोऽस्ति मां प्रति। श्रीशिव उवा
च। सिद्धकाली शिरः पातु ललाटं पातु दक्षिणा। का
लीमुखे सदा पातु कपाली पातु चक्षुषी कुल्ला गण्डौ
सदा पातु वदने कुरुकुल्लिका। विरोधिन्यधरं पातु
चिबुकं विप्रचित्तिका। उग्रा कर्णौ सदा पातु नासासु
ग्रप्रभा तथा। कण्ठं दीप्ता सदा पातु ग्रीवां नीलाप्रभा
वतु वक्षःस्थलं पातु घना पृष्ठं मात्रा सदावतु। मुद्रा
नाभिं सदा पातु मिता लिंगं सदा वतु। रतिप्रियालिं
गमूले गुह्यं शिवप्रियावतु। ब्रह्मणा तालुमूले हि
रसनां नरुणा तथा। महाकालप्रिया जानु विकटा
पातु जंघयोः। श्मशानवासिनी भार्य्या पृष्ठे पातु दि
गम्बरी। भवने मत्तहासा च मातरं मे सुरेश्वरी। रा
जस्थाने घोररावा सततं पातु कालिका। धर्म्मं पातु
घोररूपा स्वधर्म्मं मुण्डमालिनी। करकाञ्ची पातु नि
त्यं कालिका सर्व्वदावतु। कामवीजत्रयं पातु नाभि
तः पादमेव च। कूर्च्चवीजयुगं पातु सदा मे नाभिदे
शतः। शक्तिवीजद्वयं पातु ब्रह्मरन्ध्राननं पुनः। का
मवीजद्वयं पातु पूर्व्वस्यां दिशि सर्व्वदा। कूर्च्चवीज यु
गं पातु दक्षिणस्यां सदावतु। शक्तिबीजयुगं पातु

प्रतीच्यां सर्व्वदा शुभा। वह्निजायाचोत्तरस्यां दिशि पा
तु च मां सदा। विद्याराज्ञी च सर्व्वासामनिरुद्धसरस्व
ती। कालिका कवचं दिव्यं यः पठेद् यत्नतः सुधीः।
भूतप्रेतपिशाचाद्याः कुष्माण्डा राक्षसा ग्रहाः। तस्य
दूरात् पलायन्ते सत्यं सत्यं न संशयः। श्रीदेव्युवाच।
शंकरो यां स्तुतिं कृत्वा सर्व्वसिद्धीश्वरोऽभवत्। तां
मे कथय देवेश यदि स्नेहोऽस्ति मां प्रति। श्रीशिव उ
वाच। ॐ हुँ कारे शवारूढे नीलनीरजलोचने। त्रै
लोक्यैकमुखे दिव्ये कालिकायै नमोऽस्तु ते।१। प्र
त्यालीढपदे घोरे मुण्डमालाप्रलम्बिते। खर्व्वे लम्बो
दरे भीमे कालिकायै नमोऽस्तु ते।२। नवयौवनस
म्पन्ने गजकुम्भोपमस्तनि। वागीश्वरि शिवे शान्ते
कालिकायै नमोऽस्तु ते।३। ललज्जिह्वे दुरालोके
नेत्रत्रितयभूषिते। घोरहास्योत्करे देवि कालिका
यै नमोऽस्तु ते।४। व्याघ्रचर्म्माम्बरधरे खड्गकर्त्री
करे धरे। कपालेन्दीवरे वामे कालिकायै नमोऽस्तु
ते।५। नीलोत्पलजटाभारे सिन्दूरेन्दुमुखोदये।
स्फुरद्वक्त्रोष्ठदशने कालिकायै नमोऽस्तु ते।६। प्र
लयानलधूम्राभे चन्द्रसूर्याग्निलोचने। शैलावासे
शुभे मातः कालिकायै नमोऽस्तु ते।७। ब्रह्मशम्भु

जलौघे च शवमध्य प्रसंस्थिते। प्रेतकोटि समायुक्ते
कालिकायै नमोऽस्तु ते। ८। कृपामयि हरेनातः सर्वा
शापरिपूरिते। वरदे भोगदे मोक्षे कालिकायै नमोऽ
स्तु ते। ९। इत्येतत् कालिकास्तोत्रं यः पठेद्भक्तिसंयुतः
कृतकृत्यो भवेन्मंत्री नात्र कार्य्या विचारणा। इति नि
रुत्तरतंत्रे शिवपार्वतीसंवादे तृतीयः पटलः। ३।
श्रीदेव्युवाच। पूजनं कथितादेव पुरश्चर्य्या च कीदृ
शी। कथयस्व सुरश्रेष्ठ यदि स्नेहोऽस्ति मां प्रति। श्री
शिव उवाच। उत्तमा मानसी पूजा वाह्या पूजा कनी
यसी पूजया लभते पूजां जपात् सिद्धिर्न संशयः।
होमेन सर्वसिद्धिः स्यात्तस्मात्त्रितयमाचरेत्। वीरा
णां मानसी पूजा दिव्यानां च कुलेश्वरि। आसनानि
च नाडीनां संकेतं शृणु साम्प्रतं। एतज्ज्ञानं विना
देवि पुरश्चर्य्या न जायते। आसनं प्राणसंरोधः प्र
त्याहारश्च धारणं। ध्यानं समाधिरेतानि योगांगा
नि भवंति षट्। आसनानि कुलेशानि यावंतो जी
वजंतवः। चतुरशीतिलक्षाणां जंतवः समुदाहृ
ताः। आसनेभ्यः समस्तेभ्यः साम्प्रतं द्वयमुच्यते।
एकं सिद्धासनं नाम द्वितीयं कमलासनं। नाडीनां
समूहो देवि व्यक्तस्याऽस्ति खगाण्डवत्। तत्र नाड्यः

समुद्भूताः सहस्राणां हि सप्ततिः। प्रधानं प्राणवा
हिन्यः स्वयं तत्र दश स्मृताः। ईडा च पिंगला चैव सु
षुम्ना चैव कीर्त्तिता। गान्धारी हस्तिजिह्वा च पूषा
चैव यशस्विनी। अलम्बुषा कुहूश्चैव शंखिनी च द
श स्मृताः। एवं नाडीमयं चक्रं विज्ञेयं शाक्तिचक्रके।
ईडायाः पिंगलायाश्च मध्ये यत्तत् सुषुम्ना। इयं च
त्रिगुणा ज्ञेया ब्रह्म विष्णु शिवात्मिका। रजोगुणा
वज्राख्या च चित्रिणी सत्त्वसम्पदा। तमोगुणा ब्रह्म
नाडी कार्य्यभेदक्रमेण च। ईडायाः पिंगलायाश्च प
ताः सर्व्वाः प्रकीर्त्तिताः। एताश्च प्राणवाहिन्यः सोम
सूर्य्याग्निदेवताः। ईडा नाडी स्थिता वामे दक्षिणे चै
व पिंगला। सुषुम्ना च तयोर्म्मध्ये चन्द्रसूर्य्य प्रभे
दतः। वायवश्चैव विज्ञेया मनश्चन्द्रात्मके हृदि।
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः। हृ
दि प्राणो गुदेऽपानः समानो नाभिदेशगः। उदा
नः कंठदेशे स्याद्व्यानः सर्व्व शरीरगः। नागः कू
र्म्मोऽथ कृकरो देवदत्तो धनंजयः। प्राणाद्याः पंच
विख्याता नागाद्याः पंचवायवः। एते नाडी सम
स्रेषु वर्त्तन्ते चान्य संज्ञकाः। गुणवद्धो यथा जीवः
प्राणापानेन कर्षति। अपानः कर्षति प्राणं प्राण

ति.ह.
नं.
८

प्राणंचकर्षति । अथऊर्द्धस्थितावेत्तौयोजानातिस
योगवित् । हंसगतिःप्रकृतिर्ज्ञेया ॐकारःप्रकृते
गुणः । हकारेणवहिर्यातिसकारेणविशेत्पुनः
हंसइतिपरंमंत्रंजीवोजपतिसर्वदा । षट्शतानि
दिवारात्रौसहस्राण्येकविंशति । एतत्संख्यायु
तंमंत्रंजीवोजपतिसर्वदा । अजपानामगायत्री
योगिनांमोक्षदायिनी । अजपाचद्विधाप्रोक्ताव्य
क्तागुप्ताक्रमेणतु । व्यक्ताचद्विविधाप्रोक्ताहृदि
स्थानेव्यवस्थिता । ठकाराकाररूपाचशिवश
क्तिःप्रकीर्त्तिता । चन्द्रबीजंठकारंचतंबीजंस्मृ
तउच्यते । अजपार्थमयीगुप्तावह्निजायाप्रकी
र्त्तिता । अस्याःसंकल्पमात्रेणपुरश्चरणमुच्य
ते । प्राणायामद्विषट्केनप्रत्याहारःसउच्यते ।
प्रत्याहारसहस्रेणजानीयाद्धारणांशुभां । धा
रणाद्वादशप्रोक्ताध्यानंध्यानविशारदैः । ध्या
नद्वादशकैरेवसमाधिरभिधीयते । यत्समा
धेःपरंज्योतिरनंतंविश्वतोमुखं । अस्मिन्दृ
ष्टेक्रियाकाचिद्यातायातंनविद्यते । यथासिं
हेगजव्याघ्रेवादत्वंचशनैःशनैः । तथैवच
लितोवायुरन्यथाहन्तिसाधकं । वरतोचत्त

रादीनांविषयेषुयथाक्रमं। प्रत्याहारेत्तथाचैवं
प्रत्याहारादिरुच्यते। करणेकुम्भकादेविसमा
धिश्चप्रजायते। पुष्पान्तरगतंज्योतिर्भुवोर्मध्ये
प्रतिष्ठितं। तच्चिन्तनंकुलेशानियोगिनांपूजनं
महत्। ज्योतिषोचिंतनंचैवध्यानंविषयसंकृतिः
निर्गुणादिकभावेनवीराणांस्मरणभूलकं। स
गुणाज्योतिषोमुर्त्तिर्हृदिस्थाकालिकांस्मरेत्। आ
पादशीर्षपर्यंतपूज्यायत्नादिभिःप्रिये। ब्रह्माण्डा
न्तवद्रव्याणिचर्व्यचोष्यादिकानिच। फलपुष्पय
थागन्धंवस्त्रालंकारभूषितं। तत्सर्वंमनसादेयं
कालिकायैपुनःपुनः। पेयंजलनिधेर्मानंद्रव्यंच
गिरिमानतः। यत्नेनैवप्रदद्यात्तुकालिकायैपुनः
पुनः। इयंचमानसीपूजाकथितावरवर्णिनि।
निर्वाणादिकभावैस्तुवीरभावैःसमानता। इदंत
न्त्रंजपाम्नायेत्तातापुरश्चरणमाचरेत्। निजा
म्नायंविनादेविनकुर्याच्चपुरस्क्रियां। तस्मात
सर्वप्रयत्नेननिजाम्नायंविचिन्तयेत्। उत्तराम्ना
योदितंसर्वंकालीकुलकुलेश्वरि। सर्वाम्नायो
दितंतत्त्वंश्रीकुलचक्रमेणव। उत्तराम्नायोदि
ताविद्याभैरवीत्रिपुरसुन्दरी। मातंगीपश्चिमा

निरु.
तं.
९

म्नायेदक्षिणाम्नायेचताबुभौ। धूमाचत्वरिताचैव
पूर्वाम्नायेप्रतिष्ठिता। त्रिपुराबगलाचैवमहा
विद्याविशेषतः। दक्षिणाम्नायोदिताःसर्वाःपशु
भिःपूजिताःसदा। कालीकूर्च्चंवधूजीयाप्रणवंवा
गभवेप्रिये। मूलरूपाचयाविद्योत्तराम्नायोदि
ताशुभा। द्वाविंशात्यक्षरीविद्यादक्षिणाम्नायेप्र
तिष्ठिता। लक्षद्वयंजपेद्विद्यांदिवारात्रिप्रभेदतः
दिवालक्षंजपेद्विद्यांहविष्याशीसदाशुचिः। दशां
शंजुहुयाद्धोमात्तद्दशांशंचतर्पयेत्। तद्दशांशा
भिषेकंचतीर्थतोयेनपार्वति। तद्दशांशंहवि
ष्यान्नैर्भोजयेद्भक्तितोद्विजान्। पाशवंकथितंत
कल्पंशृणुवीरंततःपरं। नक्तंयाममतेदेविस्व
कुलंपरिचिन्तयेत्। आनीयकांतांसुशीलांकु
लभक्तांकुलार्च्चने। शक्तिचक्रंद्विधाकृत्वाशक्ति
भालेलिखेत्ततः। तत्रकामकलांदेवींशिवको
णेविलेखयेत्। तन्मध्येदेवमंत्रंतुलांछितंक
मलांचितं। तत्रदेवींसमावाह्यध्यात्वातत्रप्रपू
जयेत्। ततस्तच्छक्तिकर्णेचऋषिच्छन्दःसमन्वि
तं। मूलमंत्रंविद्याहन्याकथयेद्वामकर्णके। अ
यप्रभृतिदेवित्वंकुलदेवार्च्चनंकुरुगरोरतांम्

द्धिंकृत्वाप्रवर्त्तेःहंकुलवर्त्मने । ततःपश्चात्कुलागारे
कुलचक्रंलिखेत्प्रिये । तत्रपूजाकुलद्रव्यैःक्रियते
भक्तिभावतः । तत्रचावाहनंनास्तियतोदेवीस्वरूपि
णी । पूजयित्वायथान्यायंतत्त्वचिंतापरोभवेत् । त
त्त्वचिंतापरोमंत्रीजपेल्लक्षंकुलाकुले । दशांशंजुहु
याद्धव्यैर्मांसैर्मत्स्यैःपललान्वितैः । तद्दशांशंतर्पणंच
तथापललसंयुतैः । अभिषेकंतद्दशांशंतीर्थतोये
नपार्वति । कुलद्रव्यैस्तद्दशांशंभक्तितोभोजयेद्द्विजा
न् । आदावंतेचमध्येचशक्तिंसंभोजयेत्कुले । त
दभावेकुलेशानिशक्तिंवाचप्रपूजयेत् । तासांचकु
लचक्रांतेमनसाचप्रपूजयेत् । पुरश्चरणकालेच
यदिशक्तिंनपूजयेत् । तस्यपूजाजपोहोमोऽभिचा
रायचकल्पते । तस्मात्सर्वप्रयत्नेनशक्तीनांपूज
नंचरेत् । पुरश्चरणकालेचसंख्यानस्मरितायदि
शक्तीनांहिकुमारीणांद्विजातीनांकुलपालिनां ।
तोषणंकुलद्रव्येणभोजयेच्चपुनःपुनः । सम्प्रदाय
विदेविद्वान्दद्यात्तुगुरुदक्षिणां । वस्त्रालंकारभू
षाद्यैर्भूषयेत्कुलगुरुंप्रिये । तत्सुतंतत्सुता
न्वापितत्पत्नींवाकुलेश्वरि । पूजयेत्परयाभक्त्या
मंत्रसिद्धिंलभेद्यतः । इतिनिरुत्तरतंत्रेचतुर्थः

निरु॰ पटलः ४ श्रीदेव्युवाच । कीदृशीरजनीदेवीपूजयेत्
तं॰ किंनिवेदयेत् । तस्यावाकीदृशीपूजागायत्रीचैवकी ४
९ दृशी । जपंवाकीदृशंदेवपुरश्चर्याचकीदृशी । सा
धनंकीदृशंतस्यावदमेपरमेश्वर । श्रीशिवउवाच ।
10 निर्लोभाकामनाहीनानिर्लज्जाद्वन्द्ववर्ज्जिता । शिवा
सत्त्वगतासाध्वीस्वेच्छयाविपरीतगा । एवंसारजनी
देवीत्रिषुलोकेषुगोपिता । आत्मनापूजनेनैवसमू
लेकुलवर्त्मना । ब्रह्मणोरंतगतंज्योतिर्भ्रुवोरंतःप्रति
ष्ठितं । यतोरूपंपरंज्योतिस्तद्देवकुलमन्दिरे । मम
मासायकंवीक्ष्यक्रीडनात्पतितामृतं । तेनामृतेनमू
लेनतर्पयेद्रजनीस्वयं । कुलनाथंकुलागारेनियो
ज्यभावयेच्छिवां । श्वासोच्छ्वासेचगायत्रीत्वजपाब्र
ह्मरूपिणी । अजपारजनीगायत्रीब्रह्मगायत्रीचयो
गिनां । अजपारजनीगायत्रीरजन्यांरजनींजपेत् ।
नजपेद्दिवसेविद्वान्ब्रह्मविद्यात्मिकांपरां । जपेन्न
रकमाप्नोतिइहैवदुःखभाग्भवेत् । कलानाथंस
मानीयनियोज्यकुलमन्दिरे । योजयित्वाजपेन्मंत्रं
कुलकेनचताडयेत् । विश्रान्त्यामहतीपूजाप्राणेन
शान्तयाभवेत् । रजन्याःकथितापूजाध्यानंचतत्त्व
चिन्तनं । संकेततःकलानाथंसाधयेदेकचेतसा ।

रजनीमूलयोगेननिर्वाणपदवींव्रजेत्। शाठंच
कुलुकंपूर्तेसंकेनहीनदाम्भिकं। सन्मज्ञपमाययेहि
यांमहामोक्षप्रदायिनीं। धनाद्याकामतोवापिलोभा
द्वानिजमन्दिरे। कारयेद्यदिसापूजारौरवंनरकंव्र
जेत्। संकेतंज्ञंहट्टंज्ञात्वासाधनंशिवसाधनं। अन्य
थादुःखमाप्नोतिसयातिनरकंध्रुवं। प्रकृत्याथव्र
जेद्वापिज्ञात्वायत्नप्रपूजयेत्। सोऽपिनिर्वाणतांप्रा
प्यपुनरावृत्यभूतले। अभेदप्रकृतिंज्ञात्वाजपहो
मादिकंचरेत्। सर्वदेवस्वरूपेचसर्वमंत्रस्वरूपि
णी। प्रकृतेस्तत्वमास्थायकैवल्यंयातिनिश्चितं।
प्रकृतेस्तत्वविद्देविनसयोनौप्रजायते। अशेषापि
तमनाचर्यस्त्रीषुसमथेषुसव्रते। स्त्रीकारेसिद्धि
हानिःस्याद्रौरवंनरकंव्रजेत्। द्रव्याभावेस्वल्पमात्रेश्च
कालिकांनैवपूजयेत्। पूजयेद्यदिदेवेशिक्रुद्धा
भवतिकालिका। साधकेक्षोभमापन्नेदेवीक्षोभः
प्रजायते। तस्माद्भुक्त्वाचपीत्वाचपूजयेत्कालि
कांशुभां। विनापीत्वासुरांभुक्त्वामत्स्यमांसंरजस्व
लां। योजपेद्दक्षिणांकालींतस्यदुःखंपदेपदे।
दिव्यभावंवीरभावंविनाकालींप्रपूजयेत्। पूज
नेननरकंयातितस्यदुःखंपदेपदे। लतांसर्वांविना

देविकलौकालींनपूजयेत्। पशुभावाश्रितोदेवि
यदिकालींप्रपूजयेत्। रौरवंनरकंयातियावदा
हूतसंप्लवं। लतादर्शनमात्रेणकालिकादर्शनं
भवेत्। दृष्ट्वाचसुन्दरींशक्तिंकालींतत्रैवचिंतये
त्। शून्यागारेश्मशानेवाप्रांतरेनिर्जनेवने। न
दीतीरेपर्वतेवाशक्तिंतत्रप्रपूजयेत्। एकाकी
पूजयेच्छक्तिंनिःशंकोभयवर्जितः। गुरुंविना
नसंगीस्यात्संगीस्यान्नरकंव्रजेत्। संगाच्चधन
हानिःस्यात्सर्वंसंगाद्विनश्यति। तृतीयागेततः
पूजांरात्रौपर्यटनेप्रिये। एकाकीसंचरेद्वीरोनिः
शंकःसंगवर्जितः। रात्रौपर्यटनेनास्तिनरात्रौ
शक्तिपूजने। नार्चयेत्कालिकांदेवींशाम्भवीं
सुखमोक्षदां। मद्यंमांसंतथामत्स्यंमुद्रांचमैथु
नेविना। ब्राह्मणोवीरभावेनकालिकायैनिवेद
येत्। पूजाद्रव्यंमहेशानिपशुर्वायदिपश्यति
तद्द्रव्यंचजलेक्षिप्त्वाइष्टदेवंसुचिंतयेत्। शूद्रं
शठंचखलकंचमूर्खंचदांभिकंप्रिये। एतेचपाश
वाःप्रोक्ताःसर्वान्भावाश्रितांस्त्यजेत्। पशुभिर्दर्शि
तंद्रव्यंदेवेभ्योननिवेदयेत्। कुलपूजांकुलद्रव्यं
कुलस्त्रीकुलमंगलं। गोपनीयंपशोरग्रेप्रका

प्राग्मरणंभवेत्।ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चकुल
योगतः।पंचमैःपूजयेत्कालींमोक्षार्थीचकलौप्रि
ये।ब्राह्मणैःपीयतेमद्यंनमद्यैर्द्विजपुंगवैः।कलावा
सवयोगेनतर्पयेत्कालिकांप्रिये।पानेभ्रान्तिर्भवेद्
यस्यहूर्णास्याद्भक्तरेतसोः।सपापिष्ठोयजेन्नैवका
लींकलुषहारिणीं।कालींतारांयथाछिन्नांत्रिपुरां
भैरवींतथा।कलावासवयोगेनसर्वदापूजयेद्द्वि
जः।श्मशानभैरवींचैवउग्रतारांचपंचमीं।मातं
गींचतथाधूम्रांबगलांभुवनेश्वरीं।राजराजेश्वरीं
बालांत्वरितांमहिषमर्द्दिनीं।कलावेताश्चासवैश्च
पूज्याश्चदक्षिणांविना।ब्राह्मणोवीरभावेनसर्वांपी
त्वाजपेन्मंत्रं।सुराभावेचगोक्षीरंद्विजोदद्याद्युगे
युगे।द्रव्याभावेचानुकल्पैःपूजयेत्परदेवतां।ए
कादश्यांव्यतीपातेकर्मलोपंनकारयेत्।न
कृतेचगुरोरर्घ्येक्रमात्कोऽपिप्रलीयते।केवलं
विषयाशक्ताःपतन्त्येवनसंशयः।स्वगेहेचक्रेवी
रभावेनत्कार्यंगुरुसन्निधौतद्भावेभ्रातृभिःसा
र्द्धंकार्यंचैवविधानतः।पृथक्पात्रेपिवेद्द्रव्यं
पृथक्पात्रेचभोजनं।शक्तियुक्तंवशीह्यापियुग्मं
युगमविधानतः।शाक्तोच्छिष्टंपिवेन्मद्यंवीरोच्छि

ष्टं च चर्व्वणं स्वज्येष्ठस्य च भोक्तव्यं कनिष्ठस्य न भोजये
त्। निजशक्तिं विना देवि शान्त्युच्छिष्टं पिवेद्यदि।
रौरवे नरके घोरे यावदिन्द्राश्चतुर्दश। एकासमेव सेद्य
स्तु भुंजीत नैकभाजने। परस्परमुपस्पर्शात्स्त्रयाति नर
कं ध्रुवं। एकासमस्थो वीरो दिव्यो वा कुलसुन्दरी। सु
धां पीत्वा वीरचक्रे रौरवं नरकं व्रजेत्। महासिद्धी
श्वरो वापि भुङ्क्ते पीत्वा परस्परं। सिद्धिहानिं पुर
स्कृत्य स याति नरकं ध्रुवं। विनाशक्तिं पिवेद्द्रव्यं वी
रो गुरुपरायणः। तथापि नरके घोरे पतत्येव न
संशयः। शक्त्यभावे कुलेशानि तद्द्रव्यं जलतः क्षि
पेत्। गुरुभावे तद्भागं च जलतो विनिवेदयेत्।
इति निरुत्तरतंत्रे पंचमः पटलः। ५। श्रीदेव्युवा
च। रजनीपूजनाद्देव कुतो सिद्धिः कथं भवेत्। त
न्मे कथय मे सर्व्वं यद्यहं तव वल्लभा। श्रीशिव उवा
च। शृणु देवि प्रवक्ष्यामि लोकसंशयभेदकं। य
स्य विज्ञानमात्रेण जीवन्मुक्तिः प्रजायते। अज्ञा
नतिमिराछन्ना भ्रावयोः स्मृतिवर्ज्जिताः। उन्म
ज्जंति निमज्जंति संसारजलधौ जनाः। सर्व्वाना
यं त्वमेवासि सर्व्वोऽहं पुरुषाः प्रिये। एतद्विज्ञा
नमात्रेण जायते सिद्धिभाजनः। श्रीदेव्युवाच

सर्वज्ञजगतांनाथ सर्वलोकहितेरत। केनैतत्
ज्ञानसिद्धिःस्यात्तन्मेब्रूहिकुलेश्वर। श्रीशिवउवाच
चपलासिवरारोहेहेमगौरांगीपार्वति। संसारभे
दकंज्ञानंकथंनेकथयाम्यहं। श्रीदेव्युवाच। चपला
हंसावहितामहादेवभवाम्यहं। संसारभेदकंतत्वं
कथयस्वकृपांकुरु। श्रीशिवउवाच। संसारभेद
कंज्ञानंनप्रकाश्यंकदाचन। प्रकाशनेयदायस्मि
न्सर्वमित्सर्वक्षोभवेत्। भीत्यावा कर्षितापीत्या
यनाद्वाहीनजातथा। चार्वंगीसस्मितापीनाथोव
नाहितविग्रहा। वीक्ष्यमाणातनुर्क्षीणेप्रोक्तणस्य
चतत्परा। आनीयवीरभावेनसप्रीताचार्च्छेदान
नः। विलीर्णमासनेदत्वाभवत्याध्यानतत्परः।
स्वयंमत्तहृष्णोभूत्वानिस्पृहोविगतस्पृहः। विन्दु
मात्रेणमदनसद्मनिनिधायचक्रं। वशाकारीगिरी
न्द्रजानामाज्ञाकरस्यरजनीमथवा। निशीथेतव
लिंदत्वानिरुक्तविधिनाततः। आचयोःप्रीतिजन
कंध्यात्वातत्परकर्मणा। नकार्यःकर्मसन्देहोघृ
णालज्जाविवर्जितः। भवत्याभावमापन्नःप्रकृति
सस्मितप्रदः। उत्तरादेवफलंतस्मिंसस्मितज्ञाव
मागते। मनोजामातविज्ञानेक्रमेणपरितोषिता।

नि॰रु॰ तं॰ १३

13

किंदातासिवरंत्वंमेमधुनाम्हलतर्पिते। अथवाप्यि
रथीर्निरीक्ष्यमाणेनवचक्रंरतिविग्रहेवीरः। अथु
तमथवासहस्रंप्रजमछापिकंजपेन्मनुं। सत्तका
न्तिकेयविक्रमोमन्त्रस्यममभावंप्रतियाति। विप्रा
लेनवममपद्मणिनित्यंयोगीन्द्रोभावनानिपुणः।
कुरुतेगुरूपदिष्टंभुविभैरवभावमर्हति। कथया
मिवरारोहेशृणुतत्त्वंपरात्परं। कथितंनैवकस्मै
चिन्यदिसंसारमिच्छति। स्त्रीपुंसोःसंगमेसौख्यं
जायतेतत्परंपदं। तदावयोश्वविन्यस्तंयाभ्यांता
भ्यांकृतेनहि। भाजनःसर्वविद्यानांब्राह्मणःका
मिनीगणे। वीराणांजायतेश्रेष्ठोभुविभुविश्वा
स्पदं। आवयोर्मममस्वाप्रीतिंयःकुर्याद्धिजितेन्द्रि
यः। योःसौकालींभजेद्भक्त्यासएवहिनचान्यथा।
यःकरोतिसपर्य्यांतेदेविसहगुरुमागतः। सत्वे
हैनैवकर्त्तव्योयदिसंसिद्धिमिच्छति। मनोरूपा
हिसंसिद्धिर्जायतेनात्रसंशयः। कुलागारेलभे
त्सिद्धिंदेवानामपिदुर्लभां। वर्त्तमानेपूजनेतद्य
दिसन्देहभाजनः। लभतेनैवसंसिद्धिंजन्मको
टिसहस्रकैः। इतिकथितंपरंयत्तंमहासिद्धि
विधायकंमहेशि। जगदतिहर्षविशेषतत्त्वेमर

गश्चावाक्षिविधेहिदक्षिणां । श्रीदेव्युवाच । प्रेय
सीनवदेवेशगिरीन्द्रस्यचनन्दिनी । दक्षिणाकी
दृशीनाथवदत्वंचवदाम्यहं । एवमाकर्ण्यदेवेशः
सस्मितोलोललोचनः । स्वपश्यन्गिरिजांवीक्ष्य
शृणुदेविवरानने । अरुणामरुणानल्पपीनदेशे
निधायपृथुलकुचयुगलेक्रोडेप्रौढमालिंगनंय
त् । स्वरसवदनेभ्यः कुर्मिणायेनवक्षः सृतन्वालि
गिताद्दक्षिणाभेदसिद्धो । इतिनिरुत्तरतंत्रेषष्ठः प
टलः ६ श्रीदेव्युवाच । भगवन्सर्वजीवानांसाक्षी
त्वमसिहेप्रभो । अभिषेकंपुराप्रोक्तंकीदृशंकथ
यप्रभो । श्रीशिवउवाच । अभिषेकंचद्विविधंरा
ज्ञांचज्ञानिनामपि । राजाभिषेकंदेवेशिवैदिका
दिक्रियांचरेत् । ज्ञानिनामभिषेकंतुसर्वतंत्रेषु
गोपितम् । कुलचक्रंक्रमेणैवअभिषेकंचरेत्सु
धीः । कुलनाथंगुरुंवीक्ष्यअभिषेकंगुरुश्चरेत् ।
सर्वशांतिकरंपुण्यंसर्वरोगनिवारणं । धनदं
कामदंचैवआयुर्वृद्धिकरंनृणां । सर्वसौभाग्यज
ननंमहापातकनाशनं । सर्वाशापूरकंदेविमंत्र
दोषप्रणाशनं । सर्वार्थसाधकंदेविधनवृद्धि
करंपरं । अभिचारहरंसर्वग्रहदोषनिवारणं ।

नि.रु.
तं.
१५

भूतावेशादिशमने डाकिनीनां भयापहं । तेजोवृ
द्धिकरं देवि सर्वतीर्थफलप्रदं । स्त्रीगतेष्पि दो
षेषु शरीरे मानसे तथा । तक्षकेणापि दष्टस्य वि
षपीडाविनाशनं । तेजोह्रासे बलेह्रासे बुद्धिह्रा
से धनक्षये । विकारे देशिकः कुर्यादभिषेकं वि
चक्षणः । असौभाग्ये च नारीणामभिषेकः प्रव
र्त्तते । स्त्रीणाभिषेकी त्वनन्यानभिषेके प्रवर्त्तते ।
गुरुत्वं च लभेद्देवि कर्म्मणा चाभिषेकतः । वैस्व
वं गाणपत्यं च सौरः शैवः कुलेश्वरि । अभिषेकं
षडङ्घीनशाक्तश्च कुलभूषणः । मंत्रतंत्रे च स
र्वेषामभिषेकाद्धि सिध्यति । अभिषेकेन सर्वे
षामधिकारी भवेद्ध्रुवं । अभिषेककृतो विप्रो ब्र
ह्मत्वं लभते ध्रुवं । अभिषेककृतः क्षत्री विप्रध
र्म्मत्वमागतः । वैश्यः क्षत्रियतां याति शूद्रो वैश्य
त्वमागतः । अभिषेकेण सर्वेषां वर्णोऽपि वर्णतां
त्यजेत् । ब्राह्मणस्य सुरापाने ब्राह्मण्यं त्यजते क्ष
णात् । अभिषेककृते विप्रे सुरापानं विधीयते ।
आगमः पंचमो वेदः कुलमाश्रय पार्वति । शिवो
ऽपि पंचमो वर्णः सिद्धविद्यां जपे[illegible]यतः । सव
र्णत्वं परित्यज्य शिवत्वं संप्रजायते । अभिषेकं

विनानैवब्राह्मणःसुपिवेत्सुरां।प्रशस्तसिद्धवि
द्यांचसंकेतज्ञस्ततोभवेत्।संकेतज्ञःकुलागा
रेनाभिषेकंसमाचरेत्।अभिषेककृतोमंत्रीकुल
पूजांसमाचरेत्।कुलपूजाकृतोमंत्रोपितृभूमिं
समाश्रयेत्।पितृभूमिकृतेस्थानेएकाकीविह
रेत्सदा।एकाकीविहरेद्धीरःप्रांतरेवत्रिप्रांतरे
तत्रसिद्धिंलभेद्देविदेवानामपिदुर्लभां।कुला
चारंविनादेवितेत्रमंत्रेनसिध्यति।सिद्धविद्या
कुलागारेद्रुतंसिद्धतिनिश्चितं।अभिषेककृतो
विप्रःसुरांदद्यात्युगेयुगे।सुरांपीत्वाजपेद्विद्यां
कुलागारेविशेषतः।विजयाचानुकल्पंचसुरा
भावेनिवेदयेत्।आनन्देनविनाभ्रंशोनचरप्य
तिदेवताः।पंचमेनार्चयेत्कालीकामाख्यायां
विशेषतः।कामाख्यायांविशेषेणकालिकासि
द्धिदाभवेत्।कुलाचारंविनादेविकालीमंत्रेनसि
ध्यति।अभिषेकंविनादेविकुलकर्म्मकरोतियः
तस्यपूजादिकंकर्म्मचाभिचारायकल्पते।अभि
षेकंविनादेविसिद्धविद्यांददातियः।तावत्कालं
वसेद्घोरेयावच्चन्द्रदिवाकरौ।ब्रह्मत्वंचहरित्वं
चशिवत्वंचकुलेश्वरि।सर्व्वसिद्धीश्वरत्वंचम

भिषेकेणजायते। दिव्योवीरश्चदेवेशिकुलभक्ति
परायणः। अभिषेकंचरेद्धीमान्मोक्षार्थीकुलकर्म
सुविस्तवः कुलधर्मेषुकुलद्रव्यपरायणः। सया
तिनरकंचोरंकाकंवापरजन्मनि। तस्मात्सर्वप्रय
त्नेनअभिषेकंसमाचरेत्। अभिषेकंचरेद्देविअ
पिवासपुरःसरम्। वृद्धिश्राद्धंततःकुर्य्याच्छिवश
क्तिंप्रपूजयेत्। गुरुंसंपूज्यविधिवत्स्वर्णालंका
रभूषणैः। ततःसंकल्पविधिनागुरूणांवरणं
चरेत्। ततःपूजांचरेद्देव्याःपंचमैश्चपृथक्पृथ
क्। प्रणम्यसद्गुरुंदेवदेवींचसाधकेश्वरः। गुरु
पूजांविधायाथदेव्याध्यानपरायणः। अभिषेकं
विधायाथगुर्वोदेशेचदेशिकः। शून्यागारेनदी
तीरेविल्वमूलेत्रिपांतरेमहात्रिपांतरे। त्रिप्रहरां
तरे। वापिनिर्ज्जनेपिरम्यकानने। ग्रामेपातालके
वापिपर्व्वतेतटिनीतटे। देवतायतनेवापिस्था
नेचपरिचिंतयेत्। इतिनिरुत्तरतंत्रेसप्तमःपट
लः ७ श्रीशिवउवाच। शिवशक्तिंचसंपूज्यस्था
पयेद्घटमुत्तमं। नातिह्रस्वंनातिदीर्घंस्वर्णरौप्य
विनिर्म्मितं। विशेषाच्छ्यमंत्रेवात्रिकोणेवापि
विन्यसेत्। कामवीजेनसंप्रोक्ष्यवाग्भवेनैवता

डयेत् । घाङ्काधारे समारोप्य मायया पूरणं जलैः
मंत्रेणानेन तीर्थानि देशिकस्तत्र विन्यसेत् । ॐ
गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च । सर्वे
समुद्राः सरितः सरांसि च जलाह्रदाः । ह्रदाः प्रस्र
वणाः पुण्याः स्वर्गपातालभूमिताः । सर्वतीर्था
नि पुण्यानि घटे कुर्वंतु सन्निधिं । श्रीबीजेन प्रज
पेन पल्लवं प्रतिपादयेत् । कूर्चेन फलदानं स्या
न्ह्रीं बीजेनास्थिरां चरेत् । सिन्दूरं वह्निबीजेन पुष्प
ग्रेनेन विन्यसेत् । मूलेन प्रणवेनापि डर्वी दद्या
द्विचक्षणः । हुं फट् स्वाहेति मंत्रेण कुर्याद्दर्भेण
ताडनं । विचिन्त्य देवीपीठं च तत्रावाह्य प्रपूजये
त् । अनेनैव विधानेन सर्वकर्मसु सुन्दरि । घटं
स्थाप्य यजेद्देवि षट्कर्मसु विशेषतः । महापू
जां चरेद्धीमान् षोडशोपचारकैः । गुरूणां च म
हापूजा शक्तीनां च ततः परं । ततश्चात्मायकानां
च कुर्याच्च परिपूजनं । कुमारीभ्यो वलिं दत्वा कु
लनाभ्यो विशेषतः । अभिषेकं ततो देवि कुर्याच्च
गुरुमार्गतः । स्वतंत्रोक्तविधानेन मंत्रमुच्चारणैः
सह । चालयेत्तु घटं मंत्री मंत्रेणानेन देशिकः ।
उत्तिष्ठ ब्रलकलससमेवितोऽपोषमिछिदः । स

निरु
नं.
१८
16

र्व्वतीर्थाम्बुपूर्णेनपूरयामिमनोरथं । ईशानेन्दुस्म
रत्नोणीनदंनेभुवनेश्वरी । मंत्रेणानेनवाद्यानां
निर्घोषैश्चानयेद्घटं । अभिषिंचेद्गुरुंशिष्यंयजमा
नंपुरोहितः । सिंचेद्दुष्टग्रहेऽश्वत्थैःपल्लवैर्भूतसं
गमे । सिंचेदौडुम्बरैर्मन्त्रदोषेचकरवीरजैः । यशा
धनायतेजस्वीफलकामेचभूतकैः । तुलसीमंज
रीभिश्चसर्व्वपापक्षयार्थिभिः । सर्व्वतीर्थफलावा
मेःशाक्तानांविल्वसम्भवैः । अभिचारेनारसिंहैर
भिषेकंप्रचक्ष्यते । कुष्मान्दमेषुगर्भेषुदोषेषुस्त्री
कृतेषुच । असौभाग्येननारीणांदूर्व्वाभिसेचनंच
रेत् । अथवा । सर्व्वकार्येषुसिद्ध्यर्थेदूर्व्वयाहृतप
ल्लवैः । अस्याभिषेकस्यदक्षिणामूर्त्तिऋषिरनु
ष्टुप्छन्दः शक्तिर्देवतासर्व्वसंकल्पसिद्ध्यर्थेवि
नियोगः । ॐराजराजेश्वरीशक्तिभैरवीकालभै
रवी । श्मशानभैरवीदेवीत्रिपुरानन्दभैरवी ।
त्रिपुरात्रिपुरादेवीतथात्रिपुरसुन्दरी । त्रिपु
रेशीमहादेवीतथात्रिपुरमालिका । त्रिपुरान
न्दिनीदेवीतत्रैवत्रिपुरानन्ती । एतास्त्वामभिषिं
चन्तुमंत्रपूतेनवारिणा । छिन्नमस्तामहादेवी
तथाचैकजटेश्वरी । ताराचजयदुर्गाचशूलिनी

भुवनेश्वरी। हरिताख्यामहादेवीतथाचरति
चंटिका। निम्माचनित्यरूपाचवज्रप्रस्तारिणी
तथा। एतास्त्वामभिषिंचंतुमंत्रपूतेनवारि
णा। अश्वारूढामहादेवीतथामहिषमर्दिनी
दुर्गाचनवदुर्गाचश्रीदुर्गाभगमालिनी। तथा
भगान्दरीदेवीभगक्लिन्नातथापरा। सर्वच
क्रेश्वरीदेवीतथादक्षिणकालिका। एतास्त्वा
मभिषिंचंतुमंत्रपूतेनवारिणा। क्षेमंकरीम
हाकालीचानिरुद्धासरस्वती। मातंगीचान्नपू
र्णाचराजराजेश्वरीतथा। एतास्त्वामभिषिंचं
तुमंत्रपूतेनवारिणा। उग्रचण्डाप्रचण्डाच
चण्डोग्राचण्डनायिका। चण्डाचण्डवतीचैवच
ण्डरूपातिचण्डिका। एतास्त्वामभिषिंचंतु
मंत्रपूतेनवारिणा। उग्रदंष्ट्रामहादंष्ट्राशुभदं
ष्ट्रान्तकपालिनी। भीमनेत्राविशालाक्षीमंग
लाविजयाजया। एतास्त्वामभिषिंचंतुमंत्र
पूतेनवारिणा। मंगलानन्दिनीभद्रालक्ष्मीः
कीर्तिर्यशस्विनी। पुष्टिर्मेधाशिवासाध्वीय
शःशोभाजयाधृतिः। आनन्दाचसुनन्दाच
नन्दिन्यानन्दपूजिता। एतास्त्वामभिषिंचंतु

निरु
नं·
९

47

मंत्रपूतेनवारिणा।विजयामंगलाभद्रास्वस्तिः
शांतिःक्षमाधृतिः।सिद्धिस्तुष्टीरमापुष्टिःश्रीः
सिद्धिश्वरतिस्तथा।दीप्ताकीर्तिर्यशोलक्ष्मीरीश्व
रीबुद्धिरेवच।शाक्रीरमायारतिर्व्रीह्रीजयंतीचा
पराजिता।अजितामानवीश्वेताशीतिस्त्वदितिरे
वच।मायाचैवमहामायामोहिनीक्षोभिणीत
था।कमलाविमलागौरीलावण्याश्रुपिसुन्द
री।दुर्गाक्रियारुन्धतीचतथैवविग्रहात्मिका।
चण्डिकाचापराजेयातथैवसुरपूजिता।वैवस्व
तीचकौमारीतथामाहेश्वरीपरा।वैष्णवीच
महालक्ष्मीःकार्त्तिकीकौशिकीतथा।शिवदू
तीचचामुण्डामुण्डमालाविभूषिता।एतास्त्वा
मभिषिंचंतुमंत्रपूतेनवारिणा।इन्द्रोवह्निर्य
मश्चैवनैऋतोवरुणस्तथा।पवनोधनदेशा
नौब्रह्मानन्तोदिगीश्वराः।सम्वत्सराश्चायने
चमासपक्षदिनानिच।तिथ्यश्चाभिषिंचंतु
मंत्रपूतेनवारिणा।रविःसोमःकुजःसौम्यो
गुरुःशुक्रःशनैश्वरः।राहुःकेतुश्चसततम
भिषिंचंतुतेग्रहाः।नक्षत्रंकरणंयोगोस्तु
सिद्धिस्ततःपरम्।दर्पपापेतथाभद्रायोगो

वाराःक्षणास्तथा। वारवेलाकालवेलादण्डाराश्यपाद
यस्तथा। अभिषिंचंतुसततंमंत्रपूतेनवारिणा। अ
सितांगोरुरुश्चण्डःक्रोधउन्मत्तसंज्ञकः। कपालीभी
षणाख्यश्चसंहारोऽष्टौचभैरवाः। एतेत्वामभिषिं
चंतुमंत्रपूतेनवारिणा। डाकिनीपुत्रिकाचैवराकि
णीपुत्रिकातथा। ततश्चशंकिणीपुत्रीदेवीपुत्रीत
तःपरं। मातृणांचतथापुत्रीचोईमुख्याःसुताश्चयाः
अयोमुख्याःसुताश्चैवव्यालमुख्याःसुताःपराः। ए
तास्त्वामभिषिंचंतुमंत्रपूतेनवारिणा। ब्रह्माविष्णुश्च
रुद्रश्चईश्वरश्चसदाशिवः। एतेत्वामभिषिंचंतुमं
त्रपूतेनवारिणा। पुरुषःप्रकृतिश्चैवविकाराश्चैव
षोडश। आत्मापरात्माजीवात्माज्ञानात्मापरमात्म
नः। आत्मानश्चात्मनश्चैवस्थूलसूक्ष्माश्चयेऽपरे।
एतेत्वामभिषिंचंतुमंत्रपूतेनवारिणा। वेदादिबी
जंहृद्बीजंस्त्रीबीजंतन्त्रिकेतनं। शक्तिबीजंरमाबी
जंसुधाबीजंचकेवलं। चिन्तारत्नंमहाबीजंनारसिं
हंचतारकं। मन्त्रराडभैरवंदौर्गीबीजंस्त्रीपुरुषोत्त
मे। गाणपत्यंचवाराहंकालीबीजंभयापहं। त्वा
मेवमभिषिंचंतुमंत्रपूतेनवारिणा। वह्निश्चवह्नि
जायाचवषट्कारश्चमतःपरं। वौषट्कारंतुफट्का

निरु. तं. १८

18

रमभिषिंचंत्सर्वदा । नश्यंति प्रेतकूष्माण्डा राक्षसादा
नवाश्चये । पिशाचगुह्यकाभूता अभिषेकेन तर्पिताः
अलक्ष्मीः कालकर्णी च पापानि सुमहांति च । नश्यं
ति चाभिषेकेण ताराबीजेन ताडिताः । रोगाः शोका
श्च दारिद्र्यं दौर्बल्यं चित्तविभ्रमं । नश्यंति चाभिषेके
ण मन्मथेन च ताडिताः । तेजोह्रासो बुद्धिह्रासः श
क्तिह्रासस्तथैव च । नश्यंति चाभिषेकेन शक्तिबीजे
न ताडिताः । निरामिषा महारोगा डाकिन्यो मातरस्त
था । घोराभिचाराः क्रूराश्च ग्रहनागास्तथैव च । नश्यं
ति चाभिषेकेन कालीबीजेन ताडिताः । नश्यंति विप
दः सर्वे सम्पदः संतु सुस्थिराः । पूर्णाभिषेके शाक्तानां
पूर्णाः संतु मनोरथाः । एवमासिंच्य शिष्यं तु पुनः
पूजां समारभेत् । शिष्यः पितृत्रसं पूज्य गुरवे दक्षि
णां ददेत् । गोभूमिः स्वर्णरूप्यं च नानारत्नानि पार्वति
सर्वस्वं वा न दद्याद्वा न दद्याद्वापि दक्षिणां । श्रीविद्यां
सिद्धकालीं च तारां वा महिषमर्द्दिनीं । शिष्याय भ
क्तियुक्ताय प्रदद्याद्देशिकः स्वयं । श्रीविद्यां कालि
कां तारां योजयेत् परमेश्वरी । तस्मै नैव प्रदातव्यं श्रा
सीमंत्रे विना प्रिये । प्रणम्य दण्डवद्भूमौ ततश्च परि
कल्पयेत् । त्रैलोक्ययोषितां नाथ किं करोमि वदस्व

मे। श्रीगुरुरुवाच। कुलाचारंचभोवत्ससुगोप्यंकु
लाचारंचभोवत्ससुगोप्यंकुरुसर्वतः। स्वशक्तिंकौलि
कींकृत्वातत्रपूजांप्रकल्पयेत्। सिद्धमंत्रीयजेच्छक्तिं
कायेनमनसापिवा। पर्य्योषांविशेषेणसिद्धमंत्रीप्र
पूजयेत्। एतानिकुलकर्म्माणिगुरुभिरुदितानिच।
यावन्नैवसिद्धमंत्रीतावच्चस्वकुलेव्रजेत्। इतिश्री
निरुत्तरतंत्रेपार्वतीश्वरसंवादेऽष्टमःपटलः। ८
श्रीदेव्युवाच। देवदेवमहादेवसर्वसिद्धीश्वरप्रभो।
सिद्धमंत्रीभवेत्केनकर्म्मणावदमेप्रभो। श्रीशिवउ
वाच। श्मानीयमंगलेरम्येकुलभक्तेकुलार्च्चने। स्व
चक्रेविविधंकृत्वाशक्तिमालेलिखेत्ततः। तत्रका
मकलादेवीवीरकोणेलिखेत्प्रिये। तन्मध्येदेवमे
त्रेचविहितंकामलांछितं। तत्रदेवींसमावाह्य
ध्यात्वातत्रप्रपूजयेत्। ततोलक्षंचसंजप्यस्थिरधीः
कुलसाधकः। ततस्तच्छक्तिकर्णेचक्रऋषिछन्दःस
मन्वितं। मूलमंत्रंत्रियाहृत्वाकथयेद्वामकर्णके
स्वयप्रभृतिशक्तिस्त्वंकुलदेवार्च्चनेचर। गुरोराज्ञां
समादायक्षणाल्लज्जाविवर्ज्जिता। शिवोक्तविधि
नादेवकरिष्यामिकुलार्च्चनं। आदिनाथकुलाचार
कामिनीकामनायक। त्वत्पदाम्भोरुहच्छायांदेहि

मेकुलवर्त्मनि । गतेचप्रथमेयामेस्वकुलेकुलिकोपरि ।
वामभागेसमासीनेरक्तवस्त्रसमन्विते । नानागन्धसमा
युक्तेनानारत्नेनभूषिते । ललाटेमंत्रमालिख्यमध्येनाम
विदर्भिते । ताम्बूलपूरितमुखस्ताम्बूलारुणलोचनः ।
कुलाकुलजपंकृत्वाध्रुवमायान्तितत्क्षणात् । एवमाक
र्षितोमंत्रीसिद्धमंत्रीकुलेश्वरी । तावत्प्रयोगःकर्त्तव्यो
यावत्सिद्धिर्नजायते । सिद्धमंत्रीकुलाचारेपरयोषांप्रपू
जयेत् । सिद्धमंत्रीश्मशानेचपरयोषांप्रपूजयेत् । यो
षिदाकर्षणाद्देवकन्यांचैवावकर्षयेत् । देवकन्याकर्ष
णेनदेवतांकर्षयेत्तदा । आकर्षणप्रसादेनशिवपद
प्रजायते । आकर्षणंविनागच्छेत्तच्छक्तिंकौलिकींपरां
आकर्षणाद्भवेत्सिद्धिर्देवानामपिदुर्ल्लभा । आकर्ष
णाच्चनिर्वाणंलभतेनात्रसंशयः । यावन्नपूजयेद्देवीर
जनीकुलमन्दिरे । निर्वाणमपितांगस्यतावदाविर्भवेस्तु
नः । प्रकृत्याजायतेविश्वंप्रकृत्यांचविलीयते । शैवानां
वैष्णवानांचसौराणांचमहेश्वरि । स्याच्चनिर्वाणमेतेषां
मान्तराविर्भवतिहि । ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्चसदा
शिवः । सर्वेमुक्तिमुदादेवानिर्वाणंश्रेयसंविना । नि
र्वाणंश्रेयसंदेविप्रकृत्यापरिजायते । तस्मात्सर्वप्रय
त्नेनप्रकृतिंपरिपूजयेत् । प्रकृतिर्यामहामायासैव

प्रकृतिरूपिणी। विकृतौमंत्रसिद्धिःस्यात्कृतेःकुरुकं
गृहेनिर्वाणंश्रेयसंसेवप्रकृतेःकुरुकंविना। लिखेत्
मंत्रयंत्राणांपूजनेचजपंप्रिये। नियतंगुरुमार्गेणसा
धकोनिजनेचरेत्। संगहीनैःसदाकार्य्यंसंगेननर
कंव्रजेत्। प्रकृतेर्योषितोवृन्दंविकृतिःपांचभौति
की। तत्रकंसिद्धिमूलंचमंत्रयंत्रविलेखनात्। मंत्रयं
त्रंविनादेविकुरुकंविकृतेर्यदि। नगच्छेत्साधकोवीरो
नगच्छेन्नरकंव्रजेत्। प्रकृतेःकुरुकंयोनौयंत्रेमालेच
पार्वति। विनासंलिलिख्ययंत्राणिदेव्यंगच्छेत्कुलसा
धकः। कामाद्वामोहतोवोपिलोभाद्वावरवर्णिनि। प्र
कृतेःकुरुकंयंत्रेयजेत्सनरकंव्रजेत्। सिद्धिमूलंकुले
शानिविकृतेःकुरुकंस्मृतं। तत्रसंमोहयेत्सर्वंजगदे
तच्चराचरं। विकृतेःकुरुकाप्तोमंत्रतंत्रविशारदः।
तद्देहंचपरित्यज्यनिर्वाणंश्रेयसंव्रजेत्। ब्रह्मणानत
वाविष्णोनगणेशोषडानने। प्रकृतेःकुरुकंदानेनकु
त्रापिप्रकाशितं। इतिश्रीनिरुत्तरतंत्रेपार्वतीशिव
सम्वादेनवमःपटलः ९ श्रीदेव्युवाच शक्तिनीना
विधाप्रोक्तासंप्रायोजायतेसदा। कुलीनांकीदृशीदेवी
ब्राह्मणःपूजयेत्सदा श्रीशिवउवाच सर्वजात्युद्भवा
शक्तियोगिभिःपूज्यतेसदा। यांयांपश्यतियोगीन्द्र

निरु. तं. २१

स्तांतामेवप्रपूजयेत्। वीरशक्तिर्विशेषेणशृणुष्ववरव
र्णिनि। प्रपश्चर्य्याकृतावीराःप्रशस्तावीरसाधने। प्रप
श्चर्य्याविहीनाश्चेत्तयोग्याःकुलसाधने। योग्यश्चेत्सिद्धि
हानिःस्याद्रौरवंनरकंव्रजेत्। वीरशक्तिंविनादेविन
कुर्य्यात्कुलसाधनं। तदभावेहीनजातौप्रशस्तावीर
साधने। पंचचक्रेप्रशस्तायास्ताःशृणुष्ववरानने। च
क्रंपंचविधंप्रोक्तंतत्रशक्तिंप्रपूजयेत्। राजचक्रंमहा
चक्रंदेवचक्रंतृतीयकं। वीरचक्रंचतुर्थंचपशुचक्रंच
पंचमं। पंचचक्रेयजेद्दिव्योवीरश्चकुलसुन्दरी। ब्रह्म
चारीगृहस्थश्चपंचचक्रेप्रपूजयेत्। वलीयसीचदेवे
शीवीरचक्रेप्रपूजयेत्। ब्रह्मचारीगृहस्थश्चवीरचक्रे
णपूजयेत्। योगिभिःपूज्यतेदेविसर्व्वचक्रेषुकामिनी
माताचभगिनीचैवदुहिताचस्नुषातथा। गुरुपत्नीच
पंचैताराजचक्रेप्रपूजयेत्। गौरीवाप्यथवासाध्वीसु
राशस्ताकुलेश्वरी। शुद्धिस्त्रागोद्भवाशस्तातृतीयावे
दसम्भवा। सुभ्रागोध्रमजाशस्तास्वयम्भुकुसुमेन
या। कुण्डगोलोद्भवंद्रव्यंप्रनुकल्पंनियोजयेत्। र
क्तचन्दनंतथास्वेतमनुकल्पंचचन्दनं। वस्त्रालंका
रभूषाद्यैर्गन्धमाल्यानुलेपनं। पूजयेत्परयाभक्त्या
देवताभ्योनिवेदयेत्। मत्स्यंनानाविधंद्रव्यंनानाव

स्त्रसमन्वितं । आसवंशुद्धिसंयुक्तंनाम्योदयात्पुनःपु
नः । प्रणम्यप्रजपेन्मंत्रंदशायुताश्वसहस्रकं । अंगे
नैवस्पृशेन्नासांस्पृशेच्चनरकंव्रजेत् । मधुमत्तायदा
ताम्बूलंनस्वपंतिसमसमप्रदः । तत्तद्दैवंभवेत्सर्वंसत्यंस
त्येनसंशयः । षष्टिवर्षसहस्राणिशिवलोकेमहीय
ते । मातःभग्नीस्नुषाकन्यावीरपत्नीकुलेश्वरि । महा
चक्रेयजेदेताःपंचशक्तीःपुनःपुनः । द्रव्यदानेनसं
पूज्यानशात्वौशिवयोजनं । योजयेत्सिद्धिहानिःस्याद्
रौरवंनरकंव्रजेत् । महाव्याधिर्भवेद्देविधनहानिः
प्रजायते । सदैवदुःखमाप्नोतिसर्वंतस्यविनश्यति ।
आद्यंचगौडिकंप्रोक्तंद्वितीयंकुक्कुटोद्भवं । तृतीयंरो
हितंप्रोक्तंचतुर्थंमाषसम्भवं । करवीरोद्भवंपुष्पं
चन्दनंरक्तचन्दनं । पूजयेत्परयाभक्त्याशिवलोके
महीयते । षष्टिवर्षसहस्राणिनवदेवीप्रपूजयेत्
अष्टम्यांचचतुर्दश्यांअमायांवक्कुजेऽहनि । राजचक्रे
महाचक्रेभक्त्याशक्तीःप्रपूजयेत् । शुक्लपक्षेगुरोर्वा
रेचतुर्थीसप्तमीतिथौ । महाचक्रेयजेद्भक्त्यासर्वका
मार्थसिद्धये । देवचक्रंप्रवक्ष्यामिशृणुष्ववरवर्णिनि
विदग्धासर्वजातीनांपंचकन्याःप्रकीर्तिताः । गौडि
केफलजंरम्यंद्वितीयंपद्मसम्भवं । तृतीयंशालम

त्स्यं तु चतुर्थं थान्यसंभवं। सुगत्पि गत्यपुष्पं च देवच
क्रे नियोजयेत्। देवचक्रे यजेच्छक्तिं देवलोके म
हीयते। षष्टिवर्षसहस्राणि देवकन्यां प्रपूजयेत्।
पंचकन्या यजेच्चक्रे नातिरिक्तां कदाचन। लोभाद्वा
कामतो वापि छलाद्वा वरवर्णिनि। यदि स्यात्संग
मं तासां रौरवं नरकं व्रजेत्। अष्टम्यां च चतुर्दश्यां
पक्षयोरुभयोरपि। पितृभूमिं समागम्य वीरचक्रे प्र
पूजयेत्। दिव्यवीरान्वितो मंत्री यजेच्छक्तिं वलियंसी
श्रीदेव्युवाच। मात्रादयः पंचकन्या यतीनां च कथं प्रभो।
श्रीशिव उवाच। मात्रादयः पंचकन्या हीनजाता यते
प्रिये। चतुर्वर्णोद्भवां वेश्यां विशेषेण वलियंसी। भू
मीन्द्रकन्यका माता दुहिता रजकी सुता। श्वपची च स्व
सा ज्ञेया कापाली च स्नुषा स्मृता। योगिनी निजशक्तिः
स्यात्पंचकन्याः प्रकीर्तिताः। गुरोः समीपे कर्त्तव्यमथ
वा भ्रातृभिः सह। सिद्धमंत्री भवेद्वीरो न वीरो मद्यपा
नतः। अभिषिक्तो भवेद्वीरो अभिषिक्ता च कौलिकी।
एवं च वीरशक्तिं च वीरचक्रे नियोजयेत्। क्रमसंकेत
कं चैव पूजासंकेतमेव च। मंत्रसंकेतकं चैव यंत्रसं
केतकं तथा। लिखनं मंत्रयंत्राणां संकेतं गुरुमार्गतः
संकेतज्ञं विना वीरं यदि चक्रे नियोजयेत्। निष्फलं

पूजनंदेविदुःखंतस्यपदेपदे। संकेतहीनोयोवीरो
नाभिषेकीगुरुःक्रमात्। कुलभ्रष्टःसपापिष्ठस्तं
त्यजेद्वीरचक्रके। नाभिषिक्तोवसेच्चक्रेनाभिषिक्ताच
कौलिकी। वसेच्चेद्रौरवंयातिसत्यंसत्येनसंशयः। र
वंक्रमंविनादेविवीरचक्रेवसेद्यदि। सिद्धिहानिं
सिद्धिहानिंरौरवंनरकंव्रजेत्। सर्वमयंसर्वशुद्धिं
सर्वमीनंकुलेश्वरि। सर्वमुद्रांसर्वपुष्पंस्वयम्भुकु
सुमंतथा। कुण्डगोलोद्भवंद्रव्यंनानारससमन्वितं।
प्रदद्यात्साधकश्रेष्ठोवीरचक्रेपुनःपुनः। स्वशक्तिंपू
जयेत्तत्रतदुच्छिष्टंपिबेत्प्रिये। चर्व्यंचव्यंपेष्ठनोग्रास्यं
कनिष्ठायनिवेदयेत्। एकासनेनभुञ्जीतभोजनं
नैकभाजने। परस्परमुपस्पर्शंनकर्तव्यंकदाचन।
एवंक्रमेणदेवेशिवीरचक्रंसमाचरेत्। ज्ञानीयही
नजांदेवींशक्तिमन्त्रेणशोधयेत्। संशोध्यहीनजांपू
जांवीरशक्तिंनिवेदयेत्। मधुसक्तायवीराययोद
द्याद्धीनजांसुतां। वर्षकोटिसहस्रेणतस्यपुण्यंप्रन
गच्छते। वीरायशक्तिदानंतुवीरचक्रेविधीयते। च
क्रभिन्नेचरेद्दानेरौरवंनरकंव्रजेत्। घातयेज्ञापये
द्वापिननिन्देन्ननिरीक्षयेत्। कामंक्रोधंचमात्सर्यं
विकारंलोभमेवच। कुत्सानिन्दादुरालापंगोपयेद

ष्टकंप्रिये। मंत्रंमुद्रामक्षमालांयोनिंचवीरसंगमं। म
ण्डलंचवटंपीठंसिद्धिद्रव्याणिगोपयेत्। पण्डितंवीर
मंत्रानेत्रंदेवींचयोगिनीं। कुलाचारंगुरुंदूतीमन
सापिननिन्दयेत्। मातृयोनिंपशुक्रीडांनग्नांस्त्रीमुन्न
तस्तनीं। कौलेनक्षोभितांकान्तांकामतोनावलोकये
त्। देवींगुरुंसुयोवियोश्रेष्ठोशक्तिंक्रियात्मजां। यो
गिनींभैरवींतत्त्वेश्रेष्ठतत्वेषुपूजयेत्। विमात्तादुहिता
भगीस्नुषापत्नीचपंचमी। पशुचक्रेयजेद्दीमानपशु
वन्नोषणंचरेत्। गन्धंपुष्पंचमाल्यंचवस्त्रायभरणा
निच। सिन्दूरागुरुकस्तूरीनानापुष्पाणिसुन्दरि।
भक्ष्यंनानाविधंद्रव्यंफलंनानाविधंप्रिये। एतद्द्रव्य
गणंयस्तुभक्त्यानाभ्यांनिवेदयेत्। षष्ठिवर्षसह
स्राणितिसौराजाभवेद्ध्रुवं। वीरचक्रेमंत्रसिद्धिर्भ
वत्येवनसंशयः। अमावास्यांचतुर्दश्यांपक्षयोरुभ
योरपि। श्मशानेनगतेनार्च्चंस्तूचितेनप्रकाशितं
इतिश्रीनिरुत्तरतंत्रेपार्वतीशिवसम्वादेदशमःप
टलः १० श्रीदेव्युवाच योगिनांसाधनेदेवसूचितंन
प्रकाशितं। इदानींश्रोतुमिच्छामिकृपयाकथयोप्र
भो। श्रीशिवउवाच। आत्मनोज्ञानमात्रेणतत्वज्ञानं
भवेन्नप्रिये। तत्वज्ञानीभवेद्योगीयोगीत्रिविधः

स्मृतः। निरालम्बश्चसालम्बोभक्तश्चपरमेश्वरि। भ
क्तोऽपिवीरभावेनसाधयेत्कुलसाधनं। शक्तिमात्रेय
जेद्योगीभक्तोयोगपरायणः। आत्मन्येवात्मनोयो
गंशक्तोवाशिवयोजनं। अभिषेकेनदेवेशिभैरवोजा
यतेभुवि। अवधूतोभवेद्वीरोदिराश्चकुलसुन्दरि।
श्मशानागमनिष्ठश्चकुलयोषित्परायणः। कुलशा
स्त्रार्थसंवक्ताबलिदानरतःसदा। निर्द्वन्द्वोनिरहंका
रोनिर्लोभोनिर्भयःशुचिः। गुरुदेवरतःशान्तोघृणा
लज्जाविवर्ज्जितः। रक्तचन्दनलिप्तांगोरक्तकौपीन
भूषणः। उदारचित्तःसर्व्वत्रवैष्णवाचारतत्परः। कु
लाचाररतोवीरःपण्डितःकुलवर्त्मनि। कुलसंकेत
संवेत्ताकुलशास्त्रविशारदः। महाबलोमहाबुद्धिर्म
हासाहसिकःशुचिः। नित्यकर्म्मणिनिष्ठातोदम्भहिं
साविवर्ज्जितः। परनिन्दासहिष्णुःस्यादुपकाररतःस
दा। वीरमासनमासीनःपितृभूमिगतःशुचिः। सर्व्व
दानन्दहृदयःकुमारीपूजनेरतः। एवंयदिभवेद्वीर
स्तदैवहीनजंयजेत्। दिव्योऽपिवीरभावेनसाधयेत्कु
लसाधनं। कुलेचसर्व्वजातीनांपूजनीयंकुलार्च्चने।
सिद्धविद्याविशेषेणसिद्धिदाकुलपूजने। श्मशाने
निर्ज्जनेरम्येविपिनेशून्यमण्डले। ग्रामेपात्तालकेवा

पिसाधयेत्कुलसाधनं। वलिधानेविनापानंश्मशानग
मनेविना। जपपूजादिकंकर्म्मचभिचारायकल्पते। त
स्मात्सर्वप्रयत्नेनवलिदानंसमाचरेत्। एवंपूर्वमुद्ध
त्यमन्त्रभावेनततःपरं। ततोविकटदंष्ट्रेचपरपदंमोहय
द्वयं। खादयद्वयमुक्काचपरपदंतुद्वयंतथा। यामांह्रि
सिद्धमुद्यताचयोगिनीचहरहरहुंफट्ततःपरं। वह्नि
जायाततोदेविपरविद्यांततःपरं। आकर्षयततोदेवि
छेदककपालिने। ग्लूंद्वयंवह्निजायाअनेनवलिमा
हरेत्। अनेनवलिदानेनतुकुलकर्म्मसुसिद्धये। त्रिपा
न्तरेश्मशानेवावलिंदद्याज्जपेन्मनुं। महात्रिपान्तरेदत्त्वा
किंनसिध्यतिभूतले। वलिदानंविनाकिंचित्साधनंनै
साधयेत्। श्रीदेव्युवाच। साधकःकथितोदेवसाधिका
कीदृशीप्रभो। श्रीशिवउवाच। निर्लोभाकामनाहीना
निर्लज्जादम्भवर्ज्जिता। शिवसंगगतासाध्वीस्वेच्छया
विपरीतगा। चतुर्वर्णोद्भवारम्भाप्रशस्ताकुलपूजने
चतुर्वर्णोद्भवानांचपरस्पर्य्याविधीयते। वर्णाशंकरतो
जातानाहीनजापरिकीर्त्तिता। लज्जालांछितभालाया
साक्षाद्भुवनेश्वरी। नानाजात्युद्भवानांचसादीक्षाकु
लपूजने। ब्राह्मणोहीनजांदेवींमनसावाप्रपूजयेत्।
अज्ञात्वाकौलिकींदेवींपशुवत्परिपूजयेत्। पशुव

त्पूजयेद्धीरोदीक्षितोवाप्यदीक्षितः । शक्तिमात्रंयजेद्धी
रःप्राप्तयोगमनाःस्मरेत् । अष्टोत्तरशतंदेवितद्योग
स्थितोजपेत् । प्रणम्यमनसादेवींतुम्वनेमनसास्मरेत्।
सुन्दरींनागरींदृष्ट्वाएवंसंचिंतयेन्नरः । सएवकालि
कापुत्रःसदाशिवइहापरः । इहदेवामंदिरेरम्येत्रिपांते
पथिचांतरे । दृष्ट्वाचसुन्दरींरम्यांमनसाचप्रपूजयेत्।
तद्योगंमनसास्मृत्वाजपेदष्टोत्तरंशतं । जपंसमर्प्य
तांदेव्यैप्रणम्यचपुनःपुनः । भक्ष्यद्रव्यंततस्ताभ्योभ
क्त्याचविनिवेदयेत् । यदाद्रव्याणिगृह्णंतितयासिद्धि
र्भवेद्ध्रुवं । यदिभाग्यवशेनैवहीनजांकौलिकीपरां।
पूजयेन्मनसावाचातत्रतत्त्वंविचिंतयेत् । अष्टोत्तरशा
तेजप्त्वाभुस्वयित्वापुनःपुनः । पुनस्तत्त्वंचरेत्तत्रजप
संख्यारमानतः । ततस्तुपूर्ववत्कृत्वापुरश्चरणमुच्चरे
त् । हीनजानेनसंयुक्तादीक्षितासैवसर्वदा । शांकरी
शक्तिकावापिवैष्णवीवाप्यवैष्णवी । सर्वदासाधनेयो
ग्यासाधकानांकुलार्चने । वाक्याद्वाक्रीडयावापिय
नाद्वामानसेनयेत् । नदोषोद्रव्यदानेचहीनजाकुल
साधने । विजयारससंयुक्ताहीनजादीक्षितासदा । त
द्भालेविलिखेन्मायांततःसाभुवनेश्वरी । हीनजाभा
लसंयुक्ताभुवनाभुवनेश्वरी । हीनजाकुलसामान्या

निरु. तं. २४

कुलचक्रंलिखेत्प्रिये। तत्रपूजांचरेद्योगीगुरुमार्गक्र
मेणच। अष्टोत्तरशतेजप्त्वापुरश्चरणमुच्यते। अथवा
शक्तिभालेतुत्रिपंचारंलिखेत्प्रिये। मंत्रंवापित्रिकोण
स्थंतत्रपूजादिकंचरेत्। वज्रपुष्पेणसंलिख्यवज्रपुष्पे
णपूजयेत्। तत्रयोगाज्जपेद्विद्यांकलौकल्मषहारिणीं
अष्टोत्तरशतेजप्त्वापरश्चरणमुच्यते। कुलजाष्टसंतो
भ्रष्टारजकीयोगिनीतथा। नटीकापालिकांवेश्यांशौ
ण्डिकांश्वपचींतथा। विदग्धांहीनजांसर्व्वांपूजयेद्द्रव्य
दानतः। आसांभालेलिखित्वायोनिंततस्ताःपरिपूजयेत्।
सर्व्वथादीक्षयेन्नैतांदीक्षयेन्नरकंव्रजेत्। नानाजात्यु
द्भवारम्भाहीनजापरिकीर्त्तिता। चतुर्व्वर्णोद्भवारम्भा
दीक्षयेद्गुरुमार्गतः। हीनजांयदिलभ्येततदान्यांप
रिचिंतयेत्। हीनजांपूजयेद्योगीनिःसंगोनिशिवा
रतः। हीनजांद्रव्यदानेनतोषायतत्वचिंतनात्। तत्र
मंत्रंचयंत्रंचलिखित्वापूजयेद्यदि। सयुक्तःकालि
कापुत्रोनसभूमौप्रजायते। कामाख्यापूजितायेनस
युक्तोनात्रसंशयः। शक्तिमंत्रानसिध्यंतिकामाख्या
पूजनंविना। ब्राह्मणीक्षत्रियावैश्यांशूद्राचवरवर्णि
नि नाहरेद्द्रव्यदानेनहरेच्चेन्नरकंव्रजेत्। आकर्षिता
यशिष्यायप्रत्यानुत्पांचरीदिता। पूजयेत्परयाभक्त्या

तासांचाहंविशेषतः। आसामभावेदेवेशिस्वशक्तिं
परिपूजयेत्। स्वशक्तौसिद्धमंत्रीस्यात्पश्चाद्देवान्प्रपू
जयेत्। अंगावरणपूजादौयदिवालक्षतेकुलं। तदै
वहीनजांशक्तिंशोधयेदङ्कवर्म्मना। हीनजांशोधये
देकांसिद्धमंत्रीत्वलिप्सितः। हीनजासुप्रसन्नाचेत्सि
द्धिर्भवतिसाधके। सर्व्वदाहीनजांशक्तिंसर्व्वत्रैवप्र
पूजयेत्। गुरुनामचयंत्रंचपूजयेत्कुलमार्गिणं।
भैरवंभैरवीतन्त्रंमनसानप्रकाशयेत्। कन्याकोटी
प्रदानेनहेमभारशतस्यच। यत्फलंलभतेदेवितत्फ
लंनिजमन्दिरे। प्रथमांद्वितीयामुक्तांशक्तिभ्योऽपि
ददेद्यदितृप्यंतिदेवताःसर्व्वायोगिन्योभैरवादयः।
पृथिवींहेमसंपूर्णांदत्वायत्फलमालभेत्। तत्फलं
कौलिकांगेहेपूजायांलभतेध्रुवं। अश्वमेधादिकंपु
ण्यंकुलीनांगृहदर्शने। गवांकोटिप्रदानेनयत्फलं
लभतेनरः। तत्फलंहीनजागेहेलभतेनात्रसंशयः
तिस्रःकोट्यर्द्धकोटीचतीर्थस्नानेषुतत्फलं तत्फलं
लभतेदेविकुलीनांयंत्रदर्शने। कुलीनांयंत्रमालि
ख्यद्युयत्कर्म्मसमाचरेत्। तत्कर्म्मसफलंयातिसत्यं
सत्यंनसंशयः। कुलीनायंत्रमालोक्यसर्व्वपापैःप्र
मुच्यते। शैवाःशाक्ताश्चसौराश्चवैष्णवाश्चकुलेषु

रि। पूजयंति सदा भक्त्या कुलीनां गृहमन्दिरे। सर्वेषां
यंत्रमंत्राणां दुर्गाधिष्ठात्रदेवता। यतो वै जायते वि
श्वं तस्मात्तां परिपूजयेत्। यंत्रपूजाकृतो मंत्री न सयो
नौ प्रजायते। यंत्रपूजां विना देवि न शक्ति पूजनं चरेत्
इति श्रीनिरुत्तरतंत्रे पार्वतीशिवसंवादे एकादश
पटलः। श्रीशिव उवाच। अथान्यत्संप्रवक्ष्यामि सा
धनं भुवि दुर्लभं। येन कृतेन लभेत सिद्धिं देवानामपि
दुर्लभां। ललाटे शक्तिमेत्रे तु त्रिरावृत्त्या लिखेद्बुधः।
तन्मध्ये कामबीजं च विलिखेत्कामलांछितं। कामेन
पुटितं कृत्वा पूजयेत्परमेश्वरीं। समस्तरूपकालिकां देवीं
यंत्रं च परिपूजयेत्। तच्चिंतापरो योगी जपेल्लक्षं
निराकुलः। संगत्य कुलपुष्पं तु पूजयेच्च पुनः पुनः
सहस्रं तर्पयेत्पीठे यंत्रप्रक्षालनोदकैः। एवं कृतेन ल
भेत्सिद्धिं सत्यसत्येन संशयः। अथान्यत्संप्रवक्ष्या
मि पुरश्चरणमुत्तमं। शतं भाले शतं केशे शतं सि
न्दूरमण्डले। शतमेकं मुखाब्जे च पुष्पवक्त्रे शतं हृ
दये। शतं द्वन्द्वकुचद्वन्द्वे शतं च नाभिमण्डले। शत
मेकं कुलागारे प्रजपेद्भक्तिभावतः। एवं दश शतं
जप्त्वा कुलागारे ततो जपेत्। पूजयित्वा जपेन्मंत्रंगा
जांतकसहस्रकं। ततस्तु तत्त्वयोगेन शतमष्टोत्त

रंजपेत्। पूजनंचपुनस्तत्रपुरश्चरणमुच्यते। अथान्य
त्संप्रवक्ष्यामिकुलागाररसायनं। येनकृतेनकुलेशा
निसर्वपापक्षयोभवेत्। कुलागारेकुलाष्टम्यांकुलमा
हूयपूजयेत्। तर्पणंचजपंहोमंतत्तद्दशांशतोव्रजेत्। क
दलीतरुमूलेचद्विगुणंयदिदृश्यते। तत्रैवमहतीपू
जाकर्त्तव्यावरवर्णिनि। तद्भूतेबिल्ववृक्षेणहोमंकुर्याद्वि
चक्षणः। होमंकृत्वाजपेन्मंत्रंकोटिकोटिगुणंभवेत्।
द्विगुणंरजनीमूलंसंवीक्ष्ययोजपेन्मंत्रं। सभवेत्सर्वसि
द्धीशस्तस्यपुण्यंनविद्यते। रजनींस्वेच्छयाहूयसाधकं
कुलभूषणं। विपरीताजपेन्मंत्रंतस्याःपुण्यंनगण्यते
रजन्याथकुलागारेपुलिनेनिपुणायदि। तत्सामारज
नीकांताकमलावाथराधिका। त्रिषुलोकेषुसाधन्याव
स्त्वविश्वशिवात्मिका। सिद्धविद्यामहाविद्यामंत्रयंत्रफ
लप्रदा। तस्याःप्रसादमात्रेणदुष्टमंत्रोऽपिसिध्यति। त
स्मात्सर्वप्रयत्नेनतामेवशरणंव्रजेत्। रजन्यांरजनी
योगंविहरेद्यदिसाधकः। जपेद्वापूजयेत्तत्रसर्वंतस्मि
त्फलंभवेत्। येनतेनप्रकारेणरजनीतोषणंचरेत्।
वाक्याद्वाक्रीडनाद्वापिरणाद्वातोषयेत्सदा। यंयंभावंर
जन्यांचतंतंभावंप्रकल्पयेत्। अतिरिक्तःकृतोभावोरौ
रवंनरकंव्रजेत्। कलायाःसम्मतिंकृत्वासाधयेत्कुल

सायनं। अन्यथा नरकं याति सत्यं सत्यं न संशयः। कला
पि सायकं ज्ञात्वा सम्मतिं नैव जायते। सा चैवं नरके घो
रे वसेदेव न संशयः। उभयोः सम्मतिं ज्ञात्वा साधयेत्कु
लसाधनं। असम्मतकुलासंगात्सिद्धिहानिः प्रजायते।
यो गच्छेद्रजनीगेहे कुलसाधनवर्जिते। स एव नरकं
याति सत्यं सत्यं न संशयः। क्रोधाद्वा कामतो वापि द्वेषा
द्वा वरवर्णिनि। न गच्छेद्रजनीगेहे गच्छेच्चेन्नरकं व्रजे
त्। अज्ञात्वा कुलसंकेतं कुलमार्गविशेषादि। स या
ति नरकं घोरं का कथा परजन्मनि। गुरुं विलंघ्य शास्त्रे
ऽस्मिन्नाधिकारी कदाचन। गुरोराज्ञां समादाय कुलपू
जां चरेत्सुधीः। पशोर्वापि शाक्ताद्वापि पूर्णाद्वा चुल्लकाद
पि नगृह्णीयात्सिद्धिविघ्नं गृह्णीयाद्दुःखभाग्भवेत्। म
धुलब्धो यथा भृंगः पुष्पात्पुष्पान्तरं व्रजेत्। ज्ञानलुब्ध
स्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्। तस्मात्सर्वप्रयत्नेन
कुलीनं गुरुमाश्रयेत्। कुलीनस्तंत्रमंत्राणां अधिका
रीति गीयते। आजन्म च परं वस्तु कुलीनाय निवेदये
त्। शुभे मासि शुभे पक्षे शुभे लग्ने शुभे दिने। पूर्वोक्त
मंत्रज्ञानेन घटं संस्थापयेत्ततः। भूर्जपत्रेण मालि
ख्य घटे संस्थाप्य यत्नतः। तत्र पूजां चरेद्धीमान महा
चीनक्रमेण च। पूजयित्वा ततो देवीं गुरुः सूर्य्यं विधिं

तयेत् । ततः कुलीनमाश्रित्य मंत्रं तंत्रं विलोकयेत् ।
अभिषेकं च तत्रैव कुर्य्यात्कुलपरायणः । पशोर्वा चु
ल्लकाद्वापि धूर्त्तोद्वा कुलपामरात् । सिद्धिविद्यां न गृ
ह्णीयाद्गृह्णीयान्नरकं व्रजेत् । जपपूजां तथा होमं साधने
सर्वकर्मसु । सर्वं च निष्फलं याति दुःखं तस्य पदे पदे ।
कुलद्रव्याणि देवेशि पश्वादिभ्यो न दर्शयेत् । तर्पये
त्सिद्धिहानिः स्याद्घोरवं नरकं व्रजेत् । कुलपूजादिकं
कर्म पशोरग्रे चरेद्यदि । तत्कर्म निष्फलं याति काक
व्यापरजन्मनि । पशोरालापनाद्देवि कुलकर्म प्रनश्य
ति । पशोर्दर्शनमात्रेण सूर्य्यदर्शनमाचरेत् । स एव
द्विविधो देवि दीक्षितोऽदीक्षितः पशुः । दीक्षितो हि भवे
त् पृथ्वोऽदीक्षितो हि महापशुः । पूर्वसंगात्कुलेशानि
सिद्धिहानिः प्रजायते । महापशुसमायोगान्नकुलं प्र
रणं व्रजेत् । पशुमात्रसमायोगात्स्वनराज्याधिपो भवे
त् पशुमात्रसमायोगात्कुलकर्म प्रनश्यति । तस्मात्स
र्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् । कुलीनसेवितस्या
पि मंत्रसिद्धिः प्रजायते । पशुं पाठं च धूर्त्तं च चुल्लकं च
विशेषतः । धर्मार्थकाममोक्षार्थी गुरुत्वेन न चार्चये
त् इति श्रीनिरुत्तरतंत्रे पार्वतीशिवसम्वादे द्वादशः
पटलः १२ श्रीदेव्युवाच । तासां च सिद्धिविद्यानां य

नि॰
तं॰
२७

स्नायायाःप्रपूजिताः । तास्ताःशक्तिविशेषेणकथयस्व
मयिप्रभो श्रीशिवउवाच । कुलंचसर्व्वजातीनांकुलीना
नांकुलार्च्चने । सिद्धविद्याविशेषेणसिद्धिदाकुलपूजने ।
धूमाविद्यानसिध्यंतिनापितांगनयाविना । ताराविद्या
नसिध्यंतिचाण्डालीगमनेविना । श्रीविद्याचसिध्यंति
ब्राह्मणीगमनेविना । छिन्नमस्तानसिद्ध्यंतिकापाली
गमनेविना । सिद्धविद्यानसिध्यंतिभूमीन्द्रतनयांवि
ना । जलकांतगरहेदेवीभैरवीचसुसिध्यति । मध्यमा
रहिताशोकाविहिताड्डनसिद्धिदा । साधयेद्रजनीस
र्व्वाब्राह्मणीयवनीविना । सर्व्वावस्थांपरित्यज्यसाधये
द्विजजोद्विजः । राजराजेश्वरीसाक्षाद्द्विजजारूपधारि
णी । द्विजजातोघृणादेवंद्रुतंसिध्यतिसुन्दरि । श्रेष्ठ
वर्णोद्भवांरम्भांसाधनेनैवसाधयेत् । साधयेत्सिद्धिहा
निःस्याद्घोरवंनरकंव्रजेत् । अन्यथात्संप्रवक्ष्यामिरज
नीसाधनांतरं । यस्मिन्कृतेभवेत्सिद्धिर्देवानामपिदु
र्ल्लभा । रजनीद्विगुणांवीक्ष्यसहस्रंयदिसाधकः । पंचा
शद्दिवसेयावत्तावच्चप्रत्यहंजपेत् । संपूज्यरजनीमू
र्त्तिंसंगम्यप्रजपेन्मनुं । तदावादीसुसिद्धःस्याज्जपेत्ति
तितन्तुविशेत् । पर्व्वतेहस्तमारोप्यशानशःशुद्धभाव
तः । कवितांलभतेधीमानदेवीलोकंमृतेव्रजेत् । प

ग्रमथ्यंतथाविम्बंखंजनंशिखरंतथा । चामरंवारिवि
म्बंचतिलपुष्पंसरोरुहं । त्रिसूत्रंवीत्यसंजप्यप्रातशः
शुद्धभावनः । ससर्वरजनीनाथःकलौकल्पलताभुवि
संपूज्यरजनागेहंमंतुंतत्रैवसंलिखेत् । कलावाकण
मात्रेणदेवींध्यात्वाप्रतर्पयेत् । तदुद्भवेनपुष्पेणपू
जयेद्भक्तिभावतः । सयातिशिवतांभूमौकुलद्रुमग
तःशुचिः । वृक्षतरौमहापद्मेध्यात्वादेवींप्रपूजयेत् ।
तत्वथासारसारेणतर्पयेन्मातृकासुखे । कलापूजा
क्रमेणैवरजनीवेष्टितेयदि । महानिशिजपेन्मंत्रंध्रु
वंमोक्षंसचार्हति । तिथिक्रमेणकामेनरजनीवेष्टि
तोजपेत् । तदामासेनसिद्धिःस्यात्सहस्रजपमानतः ।
अष्टम्यांचचतुर्दश्यांपाद्वियुगेयदिहप्यते । मंत्रंकला
तरेदेविलिखित्वाकुंकुमेनच । तत्पार्श्वेसाध्यमालि
ख्यताडयेत्स्पष्टिहाष्टिभिः । साध्यसक्तंजपेत्तत्रकामा
ज्ञीतत्रलभ्यते । तत्रपूजांचरेद्धीमान्महाचीनक्रमे
णच । ग्रामेपातालकेरम्येश्मशानेप्रांतरेऽपिवा ।
विलिख्ययंत्रमंत्रंचकामाख्यायांप्रपूजयेत् । तदारा
ज्यमवाप्नोतिइहैवकुलसुन्दरि । अन्तेचमोक्षमाप्नो
तिसत्यंसत्येनसंशयः । रजोमूलेरजन्यांतुयोयाति
विल्वपत्रकैः । देवीमभ्यर्च्यसहस्रंतुप्रजपेत्पित

कानने। तदा राज्यमवाप्नोति यदि वा न पलायते। चि
तायां रजनीगेहे संगम्य च जपेन्मनुं। यं यं कामयते का
मं तं तमेव ध्रुवं लभेत्। पुनश्च तत्र संपूज्य स्वयम्भुकु
सुमेन च। इहैव जायते सौख्यं मंते च मोक्षमाप्नुयात्।
महाभूतदिने नक्तं श्मशाने रजनीयुतः। सहस्रैक
प्रमाणेन किं न सिध्यति भूतले। रजनीरजसा देवि
पिण्डं च परिकल्पयेत्। यत्नान्नादीयते पिण्डं न गच्छे
त्स्वयमालयं। रजनीवेष्टनादेव यत्फलं लभते प्रिये।
तस्यापि षोडशांशं च चरेन्मार्गे न लभ्यते। शवासना
धिकफलं लतागेहे प्रवेशने। तस्यापि षोडशांशं
च कलां नार्हन्ति ते शिवाः। इति श्रीनिरुत्तरतन्त्रे पार्व
तीशिवसम्वादे त्रयोदशः पटलः १३ देव्युवाच वे
श्याचक्रीदृशी देव प्रशस्ता कुलपूजने। कस्याः सं
सर्गमात्रेण श्रेष्ठो भवति साधकः। नानाकुलगता
वेश्या कथं शस्ता कुलार्चने। श्रीशिव उवाच। गुप्त
वेश्या महावेश्या कुलवेश्या महोदया। राजवेश्या
देववेश्या ब्रह्मवेश्या च सप्तधा। कुलजा गुप्तवेश्या गा॰
स्यान्नलज्जा मदनातुरा। पशुभर्त्ता त्रिलोके गुप्तवे
श्या प्रकीर्त्तिता। कुलजा कुलवेश्या च महावेश्या प्र
कीर्त्तिता। महावेश्या कुलेशानि स्वेच्छया च दिगम्ब

री। कुलवेश्याकुलीनाचवीरपत्नीकुलेश्वरी। महो
द्यासमाख्यातास्वेच्छयाविपरीतगा। राजवल्लभा
चवेश्यास्याद्राजवेश्याप्रकीर्त्तिता। देवंसंयोज्यच
क्रेचजप्त्वातुविन्दुपातने। भगलिंगकपालेचचुम्ब
येच्चपुनःपुनः। एवंविधाकुलीनाचेद्ब्रह्मवेश्याप्र
कीर्त्तिता। दिव्यशक्तिर्वीरशक्ति स्तासांसंज्ञाप्रकी
र्त्तिता। चतुर्वर्णोद्भवानोचसंज्ञिताःपरिभाषिताः।
वेश्यावहुमतेयस्मात्तस्माद्वेश्याप्रकीर्त्तिता। वर्ण
श्रंकरतोजातासर्ववेश्याःप्रकीर्त्तिताः। कुलमार्गप्र
वृत्तायासावेश्यामोक्षदायिनी। चुंवनालिंगनाघ्रात
रतिविग्रहदर्शने। श्रामंत्रणेत्रिसन्ध्येचभगलिंग
स्यकीर्त्तने। वेश्यानांचजपोगेदंशाकरेणप्रशोदितं।
जपोगेनविनावेश्यानकुर्यात्स्थिरसंगमे। जपोंगे
प्रत्यहंकुर्यात्साशिवैःसहमोदिता। निशायांप्रज
पेन्मंत्रंस्वयम्भूशिवयोगतः। वेश्यानांजपमात्रंतु
पुरश्चरणमुच्यते। विपरीताजपेन्मंत्रंसाकालीना
त्रसंशयः। योषितांमंत्रसिद्धिःस्याद्विपरीतरतो
प्रिये। विपरीतरतोजप्त्वासर्वसम्पत्तिमालभेत्। वि
परीतरतोजप्त्वानिर्वाणपदवीव्रजेत्। विपरीतर
तोजप्त्वाकालीवद्विहरेद्भुवि। विपरीतरताकाली

विपरीताचचारिणी। विपरीतावयावेश्यासाकाली
नात्रसंशयः। योषिद्विद्यानसिध्यंतिविपरीतरतिंवि
ना। विपरीतरतावेश्यात्रिषुलोकेषुपूजिता। गाढ
मालिंगनंदत्वाचुम्बयित्वापुनःपुनः। कटाक्षैर्हर्षये
द्यंत्वंदक्षिणाकौलिकीरता। एवम्विधापुरश्चर्या
वेश्यायाश्चकुलेश्वरि। एवम्विधाभवेद्वेश्यानवेश्या
कुलटाप्रिये। कुलटासंगमाद्देवरौरवंनरकंव्रजेत्।
वीरशक्तिर्भवेद्वेश्यासाशस्तासर्वसाधने। पुरश्च
र्यायुतावेश्यायोजयेत्कुलसाधने। शिवलिंगगता
साध्वीशिवलिंगगतासती। शिवलिंगगतावेश्या
कीर्तितासापतिव्रता। योनिश्चजनिकामातालिंग
श्चजनकःपिता। विभाव्यपितरौभावेदुभयोःपरि
चिंतनं। लिंगरूपोमहाकालोयोनिरूपाचकालिका
तयोर्योगपरायस्मात्तयोर्योगपरोमहान्। स्वभैरवं
विनावेश्याशिवपूजांकरोतिया। रौरवेनरकेघोरे
वसेदाहूतसंप्लवं स्वभैरवींविनावीरोमनसानैव
संस्मरेत्। स्मरेच्चनरकंयातिमहाव्याधिपरोभवे
त्। नानावीराश्रितावेश्यापशुवेश्याकुलेश्वरि। सा
वेश्यानरकंयातिसत्यंसत्यंनसंशयः। कामाद्वा
लोभतोवापियजनाद्धावरवर्णिनि। नानावीराश्रिता

वेश्या वेश्या च नरकं व्रजेत्यनाद्वा कामतो वापि लो
भाद्वा कुलसुन्दरि। पशुसंगगता वेश्या सा वेश्या न
रकं व्रजेत्। नानावीराश्रिता वेश्या पशुसंगगता च
वा। वर्ज्जनीया प्रयत्नेन कुलसाधनकर्म्मणि। यो
ज्याचेत्सिद्धिहानिः स्याद्दुष्टवेश्याकुलार्च्चने। रोगः शो
को भवेत्तस्य धनहानिः क्षणे क्षणे। तस्मात्सर्व्वप्रय
त्नेन स्वशिवं च समाश्रयेत्। जपपूजादिकं वेश्यां स्व
शिवे परिकल्पयेत्। पुष्पिता काममापन्ना सदा रमण
मिच्छुका सर्व्वसिद्धिप्रदा वेश्या कालिकारूपधारिणी।
पितृभूमिः समाख्याता सदाशिवनिवासिनी। शिव
एव नरो ज्ञेयो लिंगरूपधरो यतः। शिवस्थाने श्मशा
ने स्यात् श्मशाने कुलजे गृहे। सृष्टस्था च चतुर्दश्यां
पक्षयोरुभयोरपि। श्मशाने नागते नार्च्चेत स्ववश्यं
पशुवद्भवेत्। तन्मंत्रं पूजितं येन सर्व्वं मंत्रं प्रपूजितं।
तत्र संजप्य देवेशि निर्व्वाणपदवीं व्रजेत्। मातृमुखे
पितृमुखे दशाजपेत्कालीं सनातनीं। सर्व्वपापवि
निर्मुक्तो निर्व्वाणपदवीं व्रजेत्। यस्मिन्नृत वेश्या
पो वाप्यथवा कुलीना भवेत्। मुक्तोत्मारणकालेन त
निर्व्वाणे विद्धि पार्व्वति। तत्कालात्तु महाकालः फल
मार्गप्रवेशिनां। मुक्तो तस्मारणकाले तु कायेन स

निरु.
तं.
३.
30

नसापिवा। श्रृंगभंगक्रमेणैवकुलीनायप्रकाश
येत्। श्रुक्रोत्सारणकालस्यत्तापनात्कालिकास्व
यं। जपांगेकालिकादेवीमहाकालंविमोहयेत्।
कुलीनाब्रह्मवेश्याचेत्राल्पस्यतपसःफलं। बहु
नाजन्मनामांतेब्रह्मवेश्याप्रजायते। त्वत्समाप्र
कृतिःकाचिद्यद्दस्तिभूमिमण्डले। तथात्वत्समो
शाक्तिस्त्रिषुलोकेषुगीयते। सान्वैवदक्षिणाका
लीमदनान्तरविह्वला। वेदेभ्योजायतेकर्मकर्म
णावंधनंभवेत्। वैदिकंकर्मसंत्यज्यस्वरतेषुस
दाजपेत्। आगमोक्तपतिःशाम्भुरागमोक्तःपति
र्गुरुः। स्वपतिःकुलजायाश्चनपतिश्चविवाहितः।
विवाहितपतित्यागेदूषणंनकुलार्चने। विवाहि
तपतिंनैवत्यजेद्वेदोक्तकर्मणि। आगमोक्तपति
स्त्वानाआगमोक्तपतिःशिवः। सिद्धविद्यानसि
ध्यंतिआगमोक्तपतिंविना। आगमोक्तपतिर्हि
वियोषितांमोक्षदायकः। कालीमेवयजेद्योषि
दागमोक्तपतिंविना। कुलजागुरवेदेविपतित्वे
वरणंचरेत्। तदासागमवेश्यास्यात्कुलजाचप
तिंविना। गमवेश्याभवेत्सैवकुलमार्गप्रवर्त्तिता
कुलमार्गप्रसक्तायामामुक्तामात्रसंशयः। कु

लज्जागुरवेदेविप्रदितस्यात्पतीच्छुका। तस्याःशिवो
महाकालःसत्यंसत्यंनसंशयः। षोडशाब्दायदासा
स्यात्कालीविक्रमतत्परा। तारापंचदशाब्दाचेतच
तुर्दशाब्दाचसुन्दरी। त्रयोदशीचोन्मुखीसाद्वाद
शाब्दाचभैरवी। एकादशगुणोपेताब्रह्मवेश्याकु
लेश्वरी। महासाध्वीसमाख्यातात्रिषुलोकेषुदु
र्लभा। स्वर्गेमर्त्येचपातालेयायास्तिष्ठंतिचांगनाः
सर्वासामपिभर्त्ताचदीक्षोवीरस्तुसाधकः। योगी
दीक्षोयदावीरःसर्वनारीपतिर्भवेत्। दीक्षोपिवी
रभावेनसर्वजास्तुङ्गवायजेत्। गुप्तवेश्यामहा
वेश्यात्रयोध्यामथुराप्रिये। मायाचकुलवेश्या
स्यात्महोदयाचकालिका। राजवेश्यादेववेश्या
द्वारकापरिकीर्त्तिता। कांचीचराजवेश्यास्याद्देव
वेश्याश्चवंतिका। द्वारावतीब्रह्मवेश्यासर्वेनामो
क्षदायिका। कुलीनाभगवतीसाक्षात्कालीतारा
सरस्वती। कुलीनाभैरवीतथाकुलीनाछिन्नमस्त
का। कुलीनासुन्दरीदेविकुलीनामहिषमर्द्दि
नी। कुलीनाभुवनावालाकुलीनाबगलामुखी।
धूमावतीकुलीनाचमातंगीकुलीनाप्रिये। कुली
नाचान्नपूर्णाचत्रिपुरात्वरितातथा। पतिव्रता

नि॰रु॰
तं॰
३१

31

कुलीनाचसतीसाध्वीमहोदया। कुलीनामेवतंत्रा
णांसिद्धिदानात्रसंशयः। कुलजादेवकन्याचकुली
नायोगिनीगणाः। रम्भोर्वशीरतीरामातिलोत्तमा
कुलसुन्दरी। एताःसर्व्वाःस्वर्गवेश्याविहरंतिकु
लात्मजाः। कुलजाःकुलवेश्यायाःकुलधर्म्मपरा
यणाः। पशुभर्त्रीस्त्रिनालोकाःकामकौतुकलाल
साः। कुलवर्त्मक्रमेणैवसदैवरमणोत्सुका। विद
ग्धावीरभावेनवीरगोपनतत्परा। विहितान्यांहिही
नजातांपूजयेद्दृश्यवायतः। ब्रह्मचारीगृहस्थोपि
विहितान्यांनचार्च्चयेत्। अर्च्चयेत्सिद्धिहानिःस्या
दुःखंचस्यात्पदेपदे। हीनजाविहितावेश्यामनसा
चप्रपूजयेत्। तद्योगंचिंतयेद्धीमानश्रान्तमष्टो
त्तरंजपेत्। जप्त्वाप्रणम्यदेवेशिभक्त्याद्रव्यंनिवेद
येत्। कामाद्वामोहतोवापिहीनजांयादिवेछति।
रौरवेनरकंयातिहीनजासंगमेनच। हीनजासं
गमंदेविमनसानस्मरेत्कलौ। कुलकर्म्मप्रवृत्ता
यासामुक्तानात्रसंशयः। कुलजाकुलवेश्याचवी
जमेकंसमाश्रयेत्। संत्यज्यपशुभर्त्तारंकुलमार्गे
प्रवेशयेत्। कुलमार्गंसमाश्रित्यवीरमेकंसमा
श्रयेत्। कुलमार्गप्रवृत्ताचेत्पतिहीनाभवेद्यदि।

कुलजा वाकुलीना वा परजन्मनि जायते। कुलधर्म्म
रता या स्या कुलधर्म्मोक्त कानया। पूजा हीना महे
शानि पत्नि हीना प्रपूजयेत्। लोकाचारक्रमेणैव पू
र्जहीलेत्त्रिता यदि। तां विहाय कुलेशानि कुलजां च
प्रपूजयेत्। गंगास्मरणमात्रेण यथा पापक्षयो भ
वेत्। कुलजा च कुलीना च मंत्रतंत्रफलप्रदा। म
हावेश्या भवेत्सैव सर्व्ववेश्या फलप्रदा। या सा च स
र्व्व विद्यानां प्रशस्ता या कुलार्च्चने। सैव शक्तिर्व्विशे
षेण सर्व्ववेश्याः प्रकीर्त्तिताः। कुलीना दर्शनेनैव
सर्व्व पापक्षयो भवेत्। कुलजानां परस्त्रीणां कुली
नाव कुलेश्वरि। सर्व्ववेश्या हीनजा च सर्व्वसिद्धिप्र
दायिनी। अनेक जन्मनामांते कुलधर्म्मः प्रवर्त्तते।
कुलधर्म्मं विना देवि न च मोक्षः प्रजायते। कुलपू
जां विना देवि सुन्दरी नैव सिध्यति। कुलपूजां विना
देवि पंचमी न हि सिध्यति। कुलपूजां विना देवि
छिन्नमस्ता न सिध्यति। कुलपूजां विना देवि काली
कुले न सिध्यति। कुलपूजां विना देवि तत्त्वज्ञानं न
जायते। तत्त्वज्ञानं विना देवि निर्व्वाणं नैव जायते।
निर्व्वाणं श्रेयसं प्राप्य मम योगं प्रजायते। निर्व्वा
णं श्रेयसं चापि मूले च कुलमन्दिरे। पंचमेः पूज

नि.रु.
तं.
३२

यत्कालीकुलीनंचकुलमन्दिरे। ब्रह्माविष्णुश्चरुद्र
श्चईश्वरश्चसदाशिवः। इन्द्रादिदशदिक्पालाश्चा
दित्यादिनवग्रहाः। असितांगादयोयेयेभैरवाश्चब
टादयः। कुलपूजाकृताःसर्वैकृतार्थाःकुलीनागृहे।
शक्तिंविनामहेशानिशक्तिमंत्रोनसिध्यति। सर्वे
षांशक्तिमंत्राणांशक्तिःसिद्धिप्रदायिनी। नटीकापा
लिकावेश्यारजकीनापितांगना। योगिनीश्वपची
शौण्डीभूमीन्द्रतनयातथा। गोपिनीमालिकारम्या
कापालीसाप्रकीर्त्तिता। पूजाद्रव्यंसमालोक्यनृत्य
गीतपरायणा। चतुर्वर्णोद्भवारम्यासानटीपरिकी
र्त्तिता। पूजाद्रव्यंसमालोक्यवेश्यारमणमिच्छति।
चतुर्वर्णोद्भवारम्यासावेश्यापरिकीर्त्तिता। पूजाद्र
व्यंसमालोक्यरजोऽवस्थांप्रकाशयेत्। सर्ववर्णो
द्भवारम्यारजकीसाप्रकीर्त्तिता। पूजाद्रव्यंसमालो
क्यकुलजावीरमाश्रयेत्। संत्यज्यपशुभर्त्तारंकर्म
चाण्डालिनीरता। शिवशक्तिसमायोगायोगिनी
साव्यवस्थिता। विपरीतरतापत्यौपात्रेपापरिहच्छ
ति। सर्ववर्णोद्भवारम्यासाशौण्डीपरिकीर्त्तिता।
सर्वदायंत्रसंस्कारोयस्याश्चपरिजायते। सैवभूमी
न्द्रजारम्यासर्ववर्णोद्भवाप्रिये। अथान्यंगोपयेद्य

स्त्रसर्व्वदापशुसंकटे। सर्व्ववर्णोद्भवारम्यागोपि
नीसाप्रकीर्त्तिता। पूजाद्रव्यसमालोक्ययामनो
परिकीर्त्तिता। सर्व्ववर्णोद्भवारम्यामालिनीसाप्र
कीर्त्तिता। शक्तभावेमहेशानियासांचकोपिदा
हरेत्। संशोध्यपंचमंतत्त्वंतर्पयेत्कुलसुन्दरी।
अंगुष्ठानामिकायोगात्तासहस्त्रस्यपार्व्वति। तर्प
येत्कालिकोवीरःसायुर्थापरिवाहनो। अंगुष्ठोभै
रवोदेवःअनामाशक्तिरुच्यते। शिवशक्तिसमा
योगात्तर्पयेद्देविदक्षिणे। तर्पणंत्रिविधंदेवि
श्रेष्ठंमध्यंकनीयसं। श्रेष्ठंचदिव्यभवस्यवीरभा
वस्यमध्यमं। कलीयांसंपशूनोचप्रदद्यात्तेज
लेक्रमात्। इतिनिरुत्तरतंत्रेशिवपार्व्वतीसं
वादेचतुर्दशःपटलः१४ श्रीदेव्युवाच। देवदे
वमहादेवकुलमार्गप्रकाशकः। पंचमंकीदृ
शंद्रव्यंतेषांशुद्धिस्तुकीदृशी। तत्प्रकाशयस
म्यङ्मेमयिनाथकृपांकुरु। श्रीशिवउवाच म
द्यंमांसंतथामीनंमुद्रामैथुनपंचमं एषांशु
द्धिंप्रवक्ष्यामिमंत्रकोषक्रमेणच। निशीथेमु
क्तकेशश्चस्वकुलेवामभागतः। संस्थाप्यन्या
सजालंचतद्गात्रेविन्यसेत्क्रमात्। स्वगात्रेच

निरु॰
तं॰
३३

33

ततोन्यस्यन्यासजालक्रमेणच । भूतशुद्धिर्विधे
याचवर्णन्यासंततश्चरेत् । अंगन्यासकरोन्यासौ
लिपिन्यासंततःपरं । ततोऽन्तर्मातृकांकृत्वामा
तृकान्यासमाचरेत् । प्राणायामंततःकृत्वाऋषि
न्यासंततःपरं । पीठन्यासंव्यापकंचकालीकुल
स्यपूजने । क्रमभंगोभवेन्नैवभवेच्चविफलंध्रुवं ।
जपपूजादिकंकर्मसर्वंनिष्फलतामियात् । त
स्मात्सर्वप्रयत्नेनक्रमभंगंनकारयेत् । जीवन्यासं
व्यापकादौविद्याराज्ञीप्रपूजयेत् । षोढान्यासंनील
कंठकामंचपरिकीर्तितं । ततोध्यात्वामहाकालीं
मानसैःपरिपूजयेत् । ततश्चपंचमंशुद्धंविशेषा
र्घ्यंततःपरं । ततःकुलंचसंपूज्यपंचानांशुद्धिमा
चरेत् । स्ववामेविन्दुषट्कोणवृत्तंचचतुरस्रकं ।
चतुर्द्वारंचसंलिख्यसामान्यार्घ्योदकेनच । अभ्यु
क्षणंततःस्थानेतत्रदेवींविचिंतयेत् । नमउक्ति
ज्वालितांधारयंत्रेसंस्थाप्यपूजयेत् । वह्नेर्दश
कलांतत्रपूजयेद्विधिपूर्वकं । आद्यष्टदेव्यःसं
पूज्याःतथाधूम्रार्चिकाकला । पूर्वंत्रिपदिकामि
ष्ठागन्धपुष्पेणपूजयेत् । अष्टदिक्षुचसूर्यस्यपू
जयेद्द्वादशीकलां । ततश्चरक्तवस्त्रेणवेष्टये

हृटमुत्तमं । चेटंसंपूजयेद्देविह्रेतनामुलमुच्चरन् ।
ॐश्रमृतादिकसोमस्यकलास्तैवपूजयेत् । तत्रा
ऽपिपंचमुद्राभिःप्रणम्यात्तुकुलेश्वरि । तितम्वसव
प्राकारैर्नमोकरतलद्वयं । ह्रींनमःइतिनमस्कुर्य्या
त्वतरस्यात्तुसास्मृता । पुटाकारंकरंवद्धामुष्टिव
द्धंचभूतले । विधायचनमस्कुर्य्यात्ह्रींनमःसंद्द
ताःस्मृताः । कृत्वापुटांजलिंभूमौक्लींनमःप्रणमे
त्प्रिये । कथितासंपुटामुद्राश्रृणुदेविपुटांजलिं ।
हृद्धाकनिष्ठयोर्मूलेतिःक्षिप्यचपुटांजलिं । कृत्वा
चहूँनमोभूमौप्रणमेत्स्यापुटांजलिः । सःनमोयो
निमुद्रायाःपंचमुद्राःप्रकीर्त्तिताः । ततःकुम्भस
मीपेतचन्दनेनचसंलिखेत् । त्रिकोणवृत्तंभूवि
म्बेतत्रसर्वपथिकायचपूजयित्वावलिंतत्रनि
धायपरमेश्वरि । मायात्रिसर्वपथिकाभ्योनमः
प्रिये । वलिमुत्सृज्यदेवेशितत्वमुद्राक्रमेणच ।
वामहस्तेनतत्त्वस्यमुद्रांवद्धामहेश्वरि । त्रिपरि
भ्राम्यमूलेनद्रव्योपरिकुलेश्वरि । देवतापश्चिमेभा
गेस्थापयेत्कुलेश्वरि । एवंसुधुपिनंकृत्वापंची
करणमाचरेत् । द्रव्यंदर्भैश्वास्त्रमंत्रैःसंताड्यपरमे
श्वरि । हमितिवामहस्तेनमुष्टिंकृत्वाकुलेश्वरि ।

अधोमुखाञ्चतज्जन्यावेष्टयेत्रिः कुलेश्वरि । मूलेनवी
क्षणंदेविअस्त्रेणाभ्युक्षणंचरेत् । त्रिखण्डांचमूले
नगृह्णीयात्परमेश्वरि । पंचीकरणमित्युक्तंक्रमशो
विधिपार्वति । कुम्भेपुष्पंनमोदत्वाप्रनवेनकुले
श्वरि । त्रिकोणंतत्रसंलिख्यतन्मध्येचह्सौः प्रिये
ह्सौः ह्सौः नमोऽन्तेनविश्वतत्रप्रपूजयेत् । प्रणवंपू
र्वमुच्चार्यवरुणंतदनंतरं । वामदेवंततोङेन्तंवौ
षट्मंत्रेणपूजयेत् । संपूज्यवामदेवंचपशुपतिंत
तोयजेत् । प्रणवंकूर्च्चबीजंचङेन्तंपशुपतिंततः
कूर्च्चयुग्ममंत्रबीजमंत्रेणपशुपतिंयजेत् । मायावी
जंसमुच्चार्यकालीबीजंततः परं । ततः परमपदंदे
विस्वामिनिचततः परं । चन्द्रसूर्याग्निभक्षिणीप
त्रापात्रंचतदनंतरं । विषयुग्मंवह्निजायादशधासं
जपेत्प्रिये । वाग्भवंभुवनालक्ष्मीः आनन्देश्वरङेन्त
कं । विद्महेचततोदेविधीमहीतितदनंतरं । इति
गायत्रींविजेप्ताक्षरकत्रयंचजपेदिति । ॐ रां रीं रू
सखहस्प रैं रौं क्रौं क्रौं कलततः परं । ततः स्वधाकु
लशापंमोचयद्वयंततः परं । अमृतेस्रावयद्वन्द्वं
वह्निजायाकुलेश्वरि । इतिद्वादशधाजप्त्वामंत्रा
णेतानिविजपेत् । ॐ एकमेवपरंब्रह्मस्थूलसू

त्ममयंध्रुवं। कचोऽङ्गवांब्रह्महत्यांतेनतेनाशयाम्य
हं ॐसूर्य्यमण्डलसम्भूतेवरुणालयसम्भवे। अमा
वीजमयेदेविशुक्रशापाद्विमुच्यते। ॐदेवानांप्रणवो
वीजंब्रह्मानन्दमयंयदि। तेनसत्येनमेदेविब्रह्मह
त्यांव्यपोहतु। इतिमंत्रत्रयेणैवविद्यासमभिमंत्र्यच।
ह्रीं श्रीं स्त्रूं श्रींकारेतिशोभिनिचततःपरं। ततोविका
रणस्येतिहरस्वरवह्निवल्लभा। इतित्रयेजप्त्वा ह्रीं
श्रीं ऐंचततःपरं। इतिप्रकाशिनीत्रिश्वजप्त्वातिरस्क
रणींजपेत्। ह्रींक्लींऐंश्रौंसमुद्धृत्यतिरस्करणीततः
परं। सकलजनवाग्वादिनिततःसकलपशुव्रते
जनमनश्चक्षुस्तनोदेविश्रोत्रजिह्वाततःपरं घ्राणो
क्तितिरस्करणंकुरुयुग्मंततःपरं। लीनेहृदयंसम
र्पितस्यपुरःप्रयांति। लीनांशुकाभरणमाल्यवि
लेपनाद्या। निद्रापटेनभुवनानितिरोदधानात्व
ङ्कं भुजैर्भगवतीपरिपातुभक्तान्। इतिध्यात्वाङ्कु
लेशानिइमंमंत्रंत्रिधाजपेत्। ठः ठः वह्निवधूर्दे
विद्व्योपरित्रिधाजपेत्। पवमानःपरानन्दःप
रिमानःपरोरसः। पवमानेपरंज्ञानंतेनत्वांपाव
यास्यहं। पावमानंचत्रिर्जप्त्वावायुवीजेनशोष
येत्। रमितिवह्निवीजेनसंदह्यप्लावनेमेदिति। का

निरु॰ तं॰ ३५

लीतारामहाविद्याषोडशीभुवनेश्वरि। भैरवीछिन्न
मस्ताचविद्याधूमावतीतथा। बगलासिद्धविद्याच
मातंगीकमलात्मिका। एतादशमहाविद्याःसिद्ध
विद्याप्रकीर्त्तिताः। कालीतारातथाछिन्नामातंगी
भुवनेश्वरी। अन्नपूर्णातथानित्यादुर्गामहिषम
र्द्दिनी। त्वरितात्रिपुरापुटाभैरवीवगलातथा। धू
मावतीतथाज्ञेयाकमलाचसरस्वती। जयदुर्गात
थाभद्रैतथात्रिपुरसुन्दरी। अष्टादशमहाविद्या
तंत्रादौकथिताःप्रिये। नात्रकालविशुद्धिःस्यात्त
मयासमयादिकं। नवारतिथिनक्षत्रेनयोगकर
णेतथा। सिद्धविद्यामहाविद्यापुरासेवाप्रकीर्त्ति
ताः। इतिश्रीनिरुत्तरतंत्रेपार्वतीश्वरसम्वादेपं
चदशःपटलः १५ ॥जम्बूमध्येतितं १९४६=

35

